'कर्पूरमंजरी' में 'कपूर' शब्द हमारे सांस्कृतिक या धार्मिक जीवन में अपना एक विशेष स्थान रखता है। देवार्चन, ताम्बूल-सेवन तथा

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

औषधादि में तो इसकी प्रयोजनशीलता है ही इसके अतिरिक्त इसका सर्वाधिक महत्त्व तन्त्र-साहित्य एवं शाक्तमत पर प्रकाश डालने में है। शाक्तमत के अनुसार कर्पूर शब्द सगुणब्रह्म का वाचक है[1] जिसमें मूलप्रकृति के तीनो गुण (सत्त्व, रज और तम) विद्यमान रहते हैं[2]। यहाँ 'क्' चित्कला (ज्ञान) का 'र्' तेज का, बीच का स्वर 'उ' रजोगुण का और अन्तिम 'म' तमोगुण का प्रतीक है। 'अ' सात्त्विक भाव का द्योतक है[3]। जब हम मूलप्रकृति से 'रजस्' और 'तमस्' को हटा देते हैं तो केवल सत्त्व गुण ही शेष रह जाता है अर्थात् 'कर्पूर' से मध्य और अन्तिम स्वर एवं व्यंजन को हटा देने के बाद तेजयुक्त शुद्धसत्त्वगुणात्मक 'क' ही शेष रह जाता है। अब इसमें इच्छा-शक्ति के प्रतीक 'ईकार' और कैवल्य-सूचक बिन्दु का जब योग हो जाता है, तब यहीं 'क्रों' आदिशक्ति का 'बीज' बन जाता है।[4] तन्त्र-शास्त्र के अनुसार यह 'बीज' धर्म, अर्थ, काम और मोक्ष सबका दायक है[5]:

ककारं धर्मदं देवि ईकारं चार्यदायकम्।
रकारं कामदं कान्ते मकारं मोक्षदायकम्।
एकत्रोच्चारणाद्देवी मोक्षनिर्वाणदायिनी॥

इस प्रकार यह स्पष्ट है कि 'कर्पूर' शब्द कितना सार्थक और महत्त्वपूर्ण है। कर्पूरमञ्जरी में तन्त्र-मार्ग के बढ़ते हुए प्रभाव को प्रदर्शित किया गया है। इसलिए कवि ने इसके शीर्षक में तन्त्रमत की दार्शनिक अर्थवत्ता को समाविष्ट करने का प्रयास किया है।

राजशेखर कृत दूसरा नाट्यग्रंथ 'बालरामायण' भी हमारे सांस्कृतिक इतिहास की एक कड़ी है। राजशेखर ने इतिहास लेखन की दो विधाओं का उल्लेख किया है।[6] एक का नाम परिक्रिया और दूसरी का पुराकल्प है। परिक्रिया में रामायण और पुराकल्प में महाभारत का उदाहरण दिया गया है। 'बालरामायण' और 'बालभारत' की रचना के द्वारा राजशेखर ने सांस्कृतिक इतिहास की बहुमूल्य सामग्री संक्षेप में एक अभिनव रूप से रखने का प्रयास किया है।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

राजशेखर की तृतीय नाट्य-कृति 'विद्धशालभंजिका' है। इस 'विद्धशालभंजिका' शब्द में हमारे मूर्तिशिल्प की परिपक्वता का संकेत है। भारत के सांस्कृतिक जीवन में मूर्तिकला और उद्यान-क्रीड़ा का एक विशेष स्थान रहा है।

राजशेखर की चौथी नाट्य-रचना 'बालभारत' है। इसके दो ही अंक मिलते हैं। अगर यह पूरा नाटक हमें मिला होता तो निश्चय ही उस काल की हमारी सांस्कृतिक जानकारी में अभिवृद्धि हुई होती।

यायावरीय राजशेखर की अन्तिम कृति 'काव्यमीमांसा' भी सांस्कृतिक दृष्टि से अत्यधिक महत्त्वपूर्ण है। यायावर शब्द में भारतीय समाज के वर्णविशेष के आचार-विचार और जीवन दर्शन का इतिहास समाहित है। 'काव्यमीमांसा' तत्कालीन समाज की बौद्धिक चेतना शिक्षा-दीक्षा, साहित्यिक रुचि और सांस्कृतिक जीवन के अन्यान्य क्षेत्रों के विषय में पर्याप्त सूचनाएँ प्रस्तुत करतो है। वस्तुतः यायावरीय राजशेखर की 'काव्यमीमांसा' को सूचनाओं का भण्डार कह सकते हैं। पूर्व मध्य-युगीन भारत के सांस्कृतिक इतिहास का स्वरूप निर्धारण करने वाला यह सर्वाधिक महत्त्वपूर्ण ग्रन्थ है।

परन्तु खेद की बात है कि आज यह ग्रन्थ अपने अधूरे रूप में ही उपलब्ध है। यद्यपि अट्ठारह अधिकरणों में इस ग्रन्थ के प्रणयन का संकेत मिलता है,[7] लेकिन इसके अधिकरण आज अनुपलब्ध हैं। केवल 'कविरहस्य' नामक अधिकरण से ही सांस्कृतिक इतिहास के अध्येताओं को संतोष करना पड़ता है। यदि यह ग्रन्थ अपने पूर्ण रूप में प्राप्त होता तो उस समय की भारतीय संस्कृति को और अधिक विस्तृत जानकारी प्राप्त होती, जिससे आज हम वंचित हैं। काव्यमीमांसा का जो अधिकरण अभी प्राप्य है, उससे यह ज्ञात होता है कि राजशेखर ने एक औपनिषदिक अधिकरण को भी इस ग्रन्थ में समाविष्ट किया था, जिससे काव्य की उपविद्याओं अर्थात् चौंसठ कलाओं का विस्तृत विवेचन किया गया था।[8] वस्तुतः आज इस अध्याय के अप्राप्य होने के कारण हमारी तत्कालीन

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

संस्कृति के एक प्रमुख अंग पर राजशेखर का साहित्य पूर्ण प्रकाश डालने में असमर्थ है।

इसके अतिरिक्त राजशेखर द्वारा रचित 'भुवनकोश' भी अभी तक उपलब्ध नहीं हो सका है। यदि यह ग्रन्थ उपलब्ध रहता तो प्राचीन भारत की भौगोलिक स्थिति और उसके सांस्कृतिक महत्त्व पर कहीं अधिक प्रकाश पड़ा होता।

अतएव, सांस्कृतिक इतिहास के निर्माण को दृष्टि से उपर्युक्त परिसीमाओं की परिधि में बैठकर ही हम राजशेखर के ग्रन्थों की मीमांसा करने को विवश हैं।

---

1. Hymn To Kale : Karpūrādi Stotra' by Arthur avolon P. 101
   कर्पूरं कल्पयति जगत् प्रपञ्चं यत्।
   तत् सगुणब्रह्म इत्यर्थः।
2. वही, पृ० 100-101
3. वही पृ० 44-45
4. Hymn To Kale : Karpūrādistotra, by Arthur Avalon, P. 37 प्रथम स्तोत्र।
5. श्रीकर्पूरादिस्तोत्रम् (तांडलतन्त्रे) पृ. 100।
6. काव्यमीमांसा अ० 2 पृ. 8 (बिहार राष्ट्र भाषा परिषद्)।
7. काव्यमीमांसा अ० 4 पृ० 4
   इतीयं प्रयोजकाङ्क्षवती संक्षिप्य सर्वमर्थमल्पग्रन्थेनाष्टादशाधिकरिणी प्रणीता।
8. काव्यमीमांसा अ० 2
   उपविद्यास्तु चतुःषष्टिः। ताश्च कला इति विदग्धवादः। स आजीवः काव्यस्य। तमौपनिषदिके वक्ष्यामः।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्राक्तनशिल्पकलायां गणपतेरङ्कनम्

—आचार्य मीरा डॉ० कैलाशनाथ द्विवेदी च

संस्कृतेरनेकेषूपादानेषु साहित्यशिल्पवास्तुचित्रादिललितकला। परस्परमाश्रित्य संसारस्य सर्वान् विषयानभिव्यञ्जयन्ति। पुरातन-भारतोय-साहित्य[1]शिल्पचित्रादिकृतिषु श्रेष्ठसांस्कृतिकस्वरूपाणामङ्कनं समुपलभ्यते, यासु गणपतिरुल्लेखनीयः पुरातात्त्विकोत्कृष्ट-मूर्तिशिल्पकला दृष्ट्या।

यद्यपि कतिपयप्राच्यविद्याविद्भिर्गणपतिरार्येतरदेवोऽवधारित-स्तथापि विष्णुरुद्रेन्द्र-सूर्यादिदेवगण इव गणपतिरपि पूजित आसीत् प्राचीन-कालादेव शैवशाक्तवैष्णवादिसर्वोपासकैः समान-श्रद्धाभक्तिपूर्वकम्। पाश्चात्यविद्वांसो गणपतिं ग्रामदेवतारूपे मानवीयविकासस्य द्वितीया-वस्थायां पशुपालनकर्मणि पूजार्हमामनन्ति। तेषां मतानुसारं गणपतेर्देव-त्वविकासः कालान्तर एवाऽभवत्। गणपतेर्गौरव-गानं-पुराणादि[2]-ग्रन्थेषु प्राप्यते, यत्र तस्यानेकनामरूपावताराणां वर्णनं वर्तते।

प्राचीनशिल्पकलाकृतिषु गणपतेरनेकरूपेषु मनोहारिण्यो मूर्तयो वर्तन्ते। सुप्रसिद्धशिल्पकलामर्मज्ञ आनन्दकुमारः स्वामी शिल्पाङ्कन-दृष्ट्येमा गणपतिप्रतिमाः प्रकारान्तरेण यक्षरूपे मन्यते। इतिहाससंस्कृति-पुरातत्त्ववेत्ता डॉ० वासुदेवशरणोऽग्रवालोऽपि[3] प्रारम्भिकगणपतिप्रतिमा यक्षरूपे निर्मिता आसन्निति तथ्यं प्रतिपादयति।

गणपतिः सामान्यतो मूषिकारूढ एकगजमुखः पञ्चगजमुखो वा विशालतुण्ड, एकदन्तो, यज्ञोपवीतधारी, लम्बकर्णो, द्विबाहुतः षोडशबाहून् धारयन् प्राक्तनशिल्पकलाकृतिषु निर्मितः। गणपतेः प्राचीनतमा प्रतिमाऽ-प्रतिमैव यान्ध्रप्रदेशेऽमरावतीनगर्यां निर्मिता मन्यते पुरातत्त्वविद्भिर्यस्यां शुण्डदन्तरहितस्स मानवाकारः। ईदृशी गणपतिप्रतिमा श्रीलङ्काया मिहिनतलेस्तूपादपि सम्प्राप्ता। अस्यां गणपतिः शुण्डदण्डसहितश्चित्रितः।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

भारतीयश्रीलङ्काप्रतिमयोरनयोः पर्याप्तं साम्यं संलक्ष्यते शिल्पकला-दृष्ट्या।

सामान्यतया गणपतिः प्रतिमासु किरीटेन करण्डकेन वा सुशोभितस्त्रिनेत्रधारी चर्द्धिसिद्धि-सहितश्च संलक्षितः। गणपतेरेका **कुषाणकालिका प्रतिमा मथुरातः** सम्प्राप्ता, यस्यां यज्ञोपवीतधारी पञ्चगजमुखो गणपतिश्च परिपूर्णमानवाकारेण विकसितां प्राक्तनशिल्पकलां प्रदर्शयति। (द्रष्टव्या मथुरासंग्रहालयो मूर्तिकलावीथी संख्या 2577)

भूमरानाम्नि स्थले सम्प्राप्ता गणपतिप्रतिमा गुप्तकालिकी प्रतीयते यस्यां गणपतिरत्यन्ताऽलंकृते सुन्दर आसने समासीनो वर्तते। अस्यां प्रतिमायां तस्य वामहस्ते मोदकपात्रं शोभते।

मध्यप्रदेशस्यो**दयगिरिगुहायां** गणपतिप्रतिमाऽप्रतिमैव विराजते, यस्यामन्यविशेषताभिः सह स नग्नः प्रदर्शितः। (द्रष्टव्योदय-गिरि-गुहा-संख्या ६)

मृन्मयी गुप्तकालीनैका गणपतिप्रतिमोत्तरप्रदेशस्य कानपुरग्रामीण-जनपदस्य **भीतरगाँवनाम्नि** ग्रामेऽवस्थिता पुरातनेष्टकामन्दिरे, यस्मिन्नुड्डीयमानो गणपतिर्गणरूपेऽङ्कितः। अस्य पार्श्वे पुरुषोऽप्युड्डीयमानः परिलक्ष्यते। प्राक्तनेतिहाससंस्कृतिपुरातत्त्वशिल्पकलाविद्भिरनुमीयते यत्प्रतिमेयं कुमारकार्तिकेयस्य।

झांसीजनपदस्य **देवगढमन्दिरेपि** प्राप्तासु गुप्तकालिकोत्कृष्टप्रतिमास्वनन्त (शेष)-शायिनो विष्णोर्निकटस्थितं देवसमूहे गणपतेरमूर्तेरप्यङ्कनं विशिष्टकलात्मकं वर्तते।

गुप्तोत्तरकालिकगणपतिशिल्पाङ्कन परम्पराऽपि गौरवपूर्णैवाऽवाप्यते, यस्यामधिसंख्यकाः कलात्मकगणपतिप्रतिमा निर्मीयन्ते स्म शिल्पिभिः। ईदृश्यः प्रतिमा भारतस्य वर्षस्य क्षेत्रे क्षेत्रे प्राप्यन्ते बाहुल्येन। पुरातनपाञ्चालजनपदस्य[1] प्रसिद्धे राजनगरे **कान्यकुब्जे (कन्नौज-नगरे)** खीस्तस्याष्टम्यां शताब्द्यां निर्मिता नृत्यद्गणपतेः प्रतिमा प्राप्ता या स्थानीये पुरातत्त्व-संग्रहालये सुरक्षिता विद्यते साम्प्रतम्।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

न केवलमुत्तरभारतेऽपि तु दक्षिणभारतस्यानेकस्थलेषु सर्वोत्तम-मूर्तिशिल्पोदाहरणभूता गणपतिप्रतिमाः प्राप्यन्ते। तत्र **बेंगीनामके** स्थाने ख्रीस्तस्य तृतीय—चतुर्थ[5]शताब्द्यां विनिर्मिता द्विभुजोत्कृष्टकलात्मक-मूर्तिरूपलब्धाऽभवत्। प्रतिमायामस्यां गणपतिः शिवपरिवारेण सह सन्दर्शितः शिल्पकारेण भावपूर्णाकर्षकमुद्रायाम्।

'दक्षिणभारते सामान्यतः सिंहारूढो गणपतिः संदृश्यते, शिल्पकला-कृतिषु, किन्तु साम्प्रतं **महाराष्ट्रे "मयूरेश्वर"** इति नाम्नैको गणपति-विग्रहो विख्यातो यत्र शिल्पिना तस्य मयूरवाहनमङ्कितम्। **मध्यप्रदेशे इन्दौरोज्जैननगरयोर्गु**णशालिगणपतेर्विशालाः प्रतिमा विख्याताः। दक्षिण-भारते **मदुराईनगरे** शक्तिस्वरूप सिंहासीनो गणपतिदर्शनीयः स प्रतिमायां पञ्चमुखो दशभुजश्च परिलक्ष्यते।

टीकमगढ़े तु गणपतिर्द्वादशबाहुरङ्कितः। अनेकेषु स्थलेषु नृत्यन् गणेशोऽङ्कितः शिल्पिभिः सुन्दररूपे प्रसन्नमुद्रायाम्। **भेड़ाघाटे** स्थले गणपतेर्नृत्य-मुद्रामयी प्रतिमाऽत्यन्ताकर्षिका प्रतीयते।

कर्णाटकप्रदेशस्य मैसूरनगस्य होयलेश्वरमन्दिरे, तञ्जौरस्य बृहदी-श्वरमन्दिरे चापि नृत्यतो गणपतेः प्रतिमाः शिल्पकलादृष्ट्याऽप्रतिमाः।

न केवलमार्यावर्ते भारते वर्षेऽपि तु विश्वस्य **बर्माजापानचीनकम्बोडिया-मारीशसथाइलैण्डहिन्देशियाटर्कीमैक्सिको**प्रभृत्यनेकेषु देशेष्वपि गणपति-प्रतिमा मन्दिरेषु संस्थापिताः संपूजिताश्च। न केवलं हिन्दुधर्मेऽपि तु बौद्ध-धर्मेऽपि गणपतेर्माहात्म्यं स्वीकृतम्। अत एव **बौद्धविहारेष्वपि** गणपति-प्रतिमाः प्राप्यन्ते। परिणामतो गणपतिपूजा भारतीयसीमा अतिक्रम्य विदेशेष्वपि प्रचलिताऽभवत् प्राचीनकालादेवोपर्युक्तदेशानां मन्दिरेषु।

गणपतेरेकविंशतेरवताराणामेकपञ्चाशतो रूपाणां सुन्दरं वर्णनं प्राप्यते पुराणग्रन्थेषु[6]। तस्य सहस्रं नामानि 'गणपतिसहस्रनामपुस्तक' उल्लिखितानि। एतेषु द्वादशनामानि परमप्रचलितानि माङ्गलिकसंस्कारेषु भारतीयानां विद्यारम्भे विवाहे[7] च सर्वविघ्नोपशान्तये।

गणपतेः शास्त्रोक्तानां **बालब्रह्मचारिबालतरुणविघ्नहर्तृ-वक्रतुण्ड-पिङ्गललक्ष्मीपतिभुवनेशनृत्यशक्तिध्वजादीनां** स्वरूपाणामभिव्यक्तिस्तु

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सम्यग्रूपेण शिल्पकलाकृतिषु न प्राप्यते, तथापि संसारेऽस्मिन् या याः शिल्पकलाकृतयोऽवशिष्टाः मूर्तिशिल्पे तास्तास्तस्य देवत्वं माङ्गलिकचारुरूपेण प्रमाणीकर्तुं प्रतिष्ठापयितुञ्चालम् ।

संक्षेपेण कथयितुं शक्यते यद्भारतीयोपासनायां विघ्ननाशिगणपतेर्महत्त्वपूर्णमनन्यं स्थानं सुरक्षितम् । अत एव तस्य मङ्गलमूर्तिं परमैकतत्त्वरूपेऽवधार्य पुरातनशिल्पकलाकृतिषु प्रतिमा इमाः पुरातात्त्विकनिधौ सर्वकारेण तथा संरक्षणीया धर्मप्राणभारतीयजनताया उपासनायै यथा मूर्तितस्करान् इमाः विदेशान् न प्रेषयेयुः पापधनार्जनाय ।

---

1. वैदिक-साहित्ये (ऋक्० शुक्लयजुर्वेदः, रुद्राष्टाध्यायी 1.1 गणानां त्वा गणपति० हवामहे ।···)
रामायणे, अयोध्या० २५।८, महाभारते, आदिपर्वणि 1.83
"सर्वज्ञो गणेशो यत् क्षणमास्ते विचारयन् ।
तावच्चकार व्यासोऽपि श्लोकानन्यान् बहूनापि ।।" आदि०1.83
2. द्रष्टव्यं-शिवपुराणं स्कन्दपुराणं गणेशेपुराणञ्च (गणपतिरूप-चरितावतारवर्णनम्) ।
3. कला और संस्कृति, प्रथम सं०, पृ० 134 । Mathura Art Musuem NO. 2577" Brahmanical Images in Mathura" J.I.S O, 1937, P127.
4. 'पंचाल' शोधपत्रिकायाः प्रथमोङ्कः 1985 (कन्नौज-महोत्सवाङ्कः) पृ० 69 South Panchal Dr. R. K. Paul; Kanpur 1985 द्रष्टव्यं चित्रम् 11A
5. द्रष्टव्यं 'दैनिक-जागरणम्" (कलासंस्कृति-परिशिष्टाङ्कः, दिनाङ्कः 16-9-88) तटस्थगोस्वामिनो लेखः 'गणपति भारतीय शिल्प में' पृ० सं. 5
6. द्रष्टव्यं गणेशपुराणम् (एकं हस्तलिखितं गणेशपुराणाख्यं पुस्तकं लेखकेनैकरसानन्दसंस्कृतमहाविद्यालयस्य पूर्वंपुराणेतिहासविभागाध्यक्षस्य पं० लालबिहारिद्विवेदिनो मैनपुरीगृहेऽवलोकितम् । इदं शतत्रयवर्षप्राचीना प्रतीयते) ।
7, सुमुखश्चैकदन्तश्च कपिलो गजकर्णकः ।
लम्बोदरश्च विकटो विघ्ननाशो विनायकः ।।
धूम्रकेतुर्गणाध्यक्षो भालचन्द्रो गजाननः ।
द्वादशैतानि नामानि यः पठेच्छृणुयादपि ।।
विद्यारम्भे विवाहे च······।
······विघ्नस्तस्य न जायते ।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तत्त्वचिन्तामणौ समवायवादः

—का. ई. धरणीधर

दयानिधिं नमस्कृत्य देवनाथं तथा गुरुम् ।
तत्त्वचिन्तामणेर्दृष्टया समवायः प्रसाध्यते ॥

संनिकर्षनिरूपणवेलायां शब्दप्रत्यक्षं प्रति समवायाख्यः संनिकर्षो हेतुरिति मणिकृतस्तत्त्वचिन्तामणौ न्यरूरुपन् । तदुपरि समवायनामकः पदार्थ एवाप्रामाणिकस्तत्कथं तस्य संनिकर्षत्वं युज्यत इति प्रश्नमुपक्षिप्य विस्तरेण समवायः प्रसाधितः । एतं समवायपदार्थमधिकृत्य प्रायः शास्त्रान्तरकारैर्बहुधा दूषणानि प्रादर्शिषत । तेषां दूषणानां न्यायमते परिहारो दृश्यते वा न वा ? तत्र मणिग्रन्थस्य पन्थाः कः ? इत्यादि विमृश्य यथाशक्ति मणिसिद्धान्तं समर्थयिष्यामः ।

वैशेषिकदर्शने समवायः

अत्र कणव्रतः—प्रथममयमेव महर्षिः समवायं प्रदर्श्य तद्विषयकं सूत्रं प्रणिनाय । तथा हि कार्यकारणयोरवयवावयविनोर्यतः संबन्धादिहेदमिति प्रत्ययः स समवायः । तन्तुषु पटः, कपालेषु घटो वीरणेषु कट इत्यादिप्रतीतयो हि पटादौ तन्त्वादिवृत्तित्वं विषयीकुर्वन्ति । तच्च वृत्तित्वं संबन्धविशेषनियन्त्रितम् । तादृशवृत्तितानियामकः संबन्धः समवाय एव । एतत् सर्वं मनसि निधाय कणभक्षः [1]'इहेदमिति यतः कार्यकारणयोः स समवायः' इत्यसूत्रयत् । अत्र कार्यकारणयोरिति सूचनेनावयवावयविनोः कार्यगुणादिकारणद्रव्ययोश्च विशिष्टबुद्धिनियामकस्समवाय इत्येतावन्मात्रं प्रतीयते । परं तु जातिव्यक्त्योर्नित्यगुणनित्यक्रियाभ्यां द्रव्यस्य च समवायः संबन्ध इत्ययं विषयः सूत्रादस्मान्नावगम्यते । तदर्थमुपस्कारकृता[2]'कार्यकारणयोरित्युपलक्षणमकार्यकारणयोरित्यपि द्रष्टव्यमि'ति व्याख्यातम् । एतेन 'कार्यकारणयोरि'ति पदमुपलक्षणमिति ज्ञायते । अथवा

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सूत्रान्तरपर्यालोचनयापि तेषां ग्रहणं सुशकमिति प्रतीमः। तथा [3]'ह्येतेन गुणत्वे भावे च सर्वेन्द्रियं ज्ञानं व्याख्यातमित्यत्र जातिव्यक्त्योरपि समवायः सूत्राभ्युपगत इति निर्धार्यते ।[4]'आत्मसमवायादात्मगुणेषु' इति सूत्रेण गुणगुणिनोः समवायः स्वीकृतः । एवं [5]'तत्समवायादात्मगुणेषु' इत्यत्र क्रियाद्रव्ययोः समवायः प्रदर्शितः । एवं [6]'कारणे समवायात् कर्माणि' [7]'तथा रूपे कारणैकार्थसमवायाच्च' इति सूत्रेऽप्यत्रानुसन्धेयौ । तथा चावयवावयविनोः कार्यगुणादिकारणद्रव्ययोश्च, गुणगुणिनोः क्रियाक्रियावतोर्नित्यद्रव्यविशेषपदार्थयोश्चाधाराधेयभावनियामकः संबन्धः समवाय इति वैशेषिकमतप्रक्रिया ।

समवायोऽतिरिक्तपदार्थो नित्य एकश्च

अयं च समवायः पृथक् पदार्थ इति वैशेषिकाः। स च न द्रव्ये न वा गुणेऽन्तर्भवति, विलक्षणबुद्धिविषयत्वात् । यथा सत्ता न द्रव्यादिष्वन्तर्भवति द्रव्यादिबुद्धिविलक्षणविषयत्वात् तथेति यावत् । तदाह कणभक्षः [8]'तत्त्वं भावेन' इति । एतेन समवायस्य नित्यत्वैकत्वे व्याख्याते ।

[9] तत्त्वचिन्तामणौ समवायः

गङ्गेशोपाध्यायस्तत्त्वचिन्तामणौ चतुर्भिरनुमानैः समवायस्यातिरिक्तपदार्थत्वं समसाधयत् ।

1. तथाहि गुणक्रियाजातिविशिष्टबुद्धयो विशेषणसंबन्धविषया विशिष्टबुद्धित्वाद्दण्डीति बुद्धिवदिति । यथा दण्डी पुरुष इति विशिष्टबुद्धिर्विशेषणस्य दण्डस्य संयोगाख्यं संबन्धं विषयीकरोति, तथा शुक्लः पट इत्यादिबुद्धिरपि विशेषणस्य शुक्लादेः संबन्धं विषयीकरोतीति वक्तव्यम् । स एव समवायः । न च स्वरूपसंबन्धो यथाऽभावविशिष्टप्रतीतौ स्वीकृतस्तथात्रापि स एव भवत्विति समवायो नार्थान्तरमिति वाच्यं, यतो गुणक्रियादिविशिष्टबुद्धीनां पक्षधर्मताबलेन विषयः संबन्धः सिद्ध्यन् लाघवादेक एव सिद्ध्यति, एव समवायो, न तु स्वरूपम् । तत्तत्स्वरूपाणामनन्तत्वात् । नापि सिद्धसाधनम्, एतदनुमानप्रवृत्तेः पूर्वं गुणादिस्वरूपाणां संबन्धत्वेनाऽक्लृप्तत्वात् । यद्यपि 'रूपे रसाभाव' इत्यादि-प्रतीत्या गुण-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

स्वरूपस्यापि संबन्धत्वं क्लृप्तम्, तथापि गुणतद्गताभावात्मकसंबन्धिद्वय-स्वरूपस्य क्लृप्तत्वेऽपि गुणगुण्यात्मकसंबन्धिद्वयस्वरूपस्य संबन्धत्वम-क्लृप्तमिति तदेव साधनीय स्यात्। तत्र च गौरवाल् लाघवसहकृतपरा-मर्शादेकः समवायोऽनुमानेन सिद्ध्यतीति मणिकृतामाशयः। यथा 'क्षित्यादि कार्यं सकर्तृकम्' इत्यत्र 'कृतिजन्यत्वव्याप्यकार्यत्ववान्' इति परामर्शादपि 'कृतेरेकत्वे लाघवमिति' लाघवज्ञानसहकृतात् 'क्षित्यङ्कुरादिकमेककृति-जन्यम्' इत्यनुमितिवत् संबन्धस्यैकत्वे लाघवमिति लाघवज्ञानसहकृताद् विशेषणविशेष्यसंबन्धविषयकत्वव्याप्यविशिष्टबुद्धित्ववती गुणक्रियादि-विशिष्टबुद्धिरिति परामर्शादपि विशेषणविशेष्ययोरेकसंबन्धविषयिण्यनु-मितिरिति सिद्ध्यति।

ननु समवायस्यैकत्वे संबन्धसत्त्वे संबन्धिसत्त्वमिति नियमाद् यत्र यत्र समवायस्तत्र तेन समवायेन तत्समवायस्य संबन्धिनो रूपादेः सत्त्वम-पेक्ष्यते। तथा च यथा वायौ स्पर्शस्य समवायो वर्तते, तेन समवायेन स्पर्शोऽपि वर्तते, तथैव तस्य समवायस्य संबन्धि यत् पृथिव्यादिगतं रूपं तस्यापि सत्त्वं वायावापद्येतेति 'वायू रूपवान्' इति प्रतीत्यापत्तिरिति चेदुच्यते। रूपसमवायसत्त्वेऽपि रूपाभावात्। रूपप्रतियोगिकत्वविशिष्ट-समवायः पृथिवीजलतेजस्सु वर्तते तस्य वायावसत्त्वात्। संबन्धाभावात् तत्संबन्धिनो रूपस्य न वायावपत्तिरिति न दोषः।

2. ननु 'धार्मिकल्पनातो वरं धर्मकल्पना' इति न्यायेन क्लृप्तानामेव गुणादिस्वरूपाणां संबन्धत्वमात्रकल्पने लाघवम्। समवायकल्पने च तस्य संबन्धत्वमपि कल्प्यमित्युभयकल्पने गौरवम्। किं च प्रतीतेर्विषयनियमः सामग्र्यधीनो लाघवादन्यथा विशेषणविशेष्यमात्रविषयकत्वे लाघवात् सविषयकत्वानुमाने सति संबन्धाविषयकत्वमेव स्यादिति पूर्वोक्तानुमाने-ऽस्वरसदर्शनादनुमानान्तरम् 'अथवा' इत्यादिना प्रादर्शि मणौ। तथाहि— गुणक्रियादिविशिष्टबुद्धिर्विशेषणसंबन्धनिमित्तिका सत्यविशिष्टबुद्धित्वा-दिति। यथा दण्डी पुरुष इति विशिष्टबुद्धिर्विशेषणभूतदण्डसंयोगं निमित्ती-कृत्य जायत एवं तन्तुषु पट इत्यादिविशिष्टबुद्धेरपि विशेषणभूतपटादि-संबन्धजन्यत्वमपेक्षितम्। स एव समवाय इति समवायसिद्धिः। भ्रमे

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

व्यभिचारवारणाय हेतौ सत्यपदं निविष्टम् । अत्र यथा क्षित्यादौ कारणत्वेनेश्वर एकः सिद्धयति, तथा विशिष्टबुद्धिकारणत्वेन सिद्धयन् समवायो लाघवादेकः सिद्धयति । अनुगतकार्यस्यानुगतकारणजन्यत्वात् । गुणादिस्वरूपत्वं नानुगतमिति तद्व्युदासः । विशिष्टबुद्धेः संबन्धाजन्यत्वे गवाश्वादावपि विशिष्टबुद्धयापत्तेः ।

3. एवं 'नव्यास्तु' इत्यादिना तृतीयमनुमानमुदटङ्कि मणौ । तथा हि गुणक्रियादिविशिष्टबुद्धिः संबन्धिभिन्नविशेषणसंबन्धविषया निर्विषयकभावविशेषणकविशिष्टबुद्धित्वादितरानिरूपणानिरूप्यविशेषणकविशिष्टबुद्धित्वाद्वेति । संबन्धिभिन्नो यो विशेषणस्य संबन्धस्तद्विषयकत्वमत्र साध्यम् । संबन्धिभिन्नेति विशेषणान्न स्वरूपसंबन्धमादायार्थान्तरस्यावकाशः । हेतौ विशिष्टेति विशेषणं निर्विकल्पके व्यभिचारवारणाय । घटाभाववद्भूतलमिति विशिष्टबुद्धौ स्वरूपसंबन्धविषयिण्यां संबन्धिभिन्नसंबन्धविषयकत्वरूपसाध्याभावाद् विशिष्टबुद्धित्वरूपहेतुसत्त्वाच्च व्यभिचारः स्यादिति तद्वारणाय भावविशेषणकेति बुद्धेर्विशेषणम् । घटाभाववद् भूतलमिति विशिष्टबुद्धावभावविशेषणकत्वमेव वर्तते, न भावविशेषणकत्वमिति न व्यभिचारः । 'ज्ञातो घटः' इति बुद्धौ ज्ञानरूपभावविशेषणकबुद्धित्वरूपहेतुसत्त्वात् स्वरूपानतिरिक्तविषयतात्मकसंबन्धविषयिण्यां तस्यां संबन्धिभिन्नसंबन्धविषयकत्वरूपसाध्याभावाच्च व्यभिचारः स्यादिति तद्वारणाय हेतुघटकभावे निर्विषयकेति विशेषणम् । विशेषणस्य ज्ञानस्य सविषयकत्वान्न दोषः ।

नन्वेवमपि 'भूतले घटाभावः' इत्यभावविशेष्यके 'घटस्य ज्ञानम्' इति ज्ञानविशेष्यके च ज्ञाने व्यभिचार इति चेन्न । निर्विषयकभावमात्रविषयकबुद्धित्वस्य विवक्षितत्वात् । तत्त्वं सविषयकभावाविषयकत्वे सत्यभावाविषयकत्वमतो न कोऽपि दोषः ।

एवमपि 'रूपसमवायवान् घटः' इति विशिष्टबुद्धावुक्तहेतुसद्भावात् स्वरूपसंबन्धविषयिण्यां तस्यां संबन्धिभिन्नसंबन्धविषयकत्वरूपसाध्याभावाच्च व्यभिचारः स्यादिति पर्यालोच्येतरनिरूपणेत्यादिद्वितीयहेत्वनु-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

धावनम् । इतरनिरूपणेन निरूप्यं यद् विशेषणं विशेष्यं च तद्विषयकबुद्धित्वादिति तदर्थः । समवायस्य प्रतियोग्यनुयोगिनिरूप्यत्वेन तद्विशेषणकबुद्धौ व्यभिचारः । अभावस्यापि प्रतियोगिनिरूप्यत्वान्न तद्बुद्धौ व्यभिचार इति मणिकृतामाशयः ।

4. एवं 'यद्वा' इति चतुर्थमनुमानं प्रादर्शि मणौ । इन्द्रियप्रत्यासत्तित्वेनापि समवायः सिद्ध्यति । तथा हि गुणक्रियादिसाक्षात्कार इन्द्रियसंबन्धसाध्यो जन्यप्रत्यक्षत्वाद् दण्डोप्रत्यक्षवदित्यनुमानेन साक्षात्संबन्धासंभवादिन्द्रियसंयुक्ते संबन्धः सिद्ध्यन् पक्षधर्मताबलाल्लाघवेनानुगतः समवायः सिद्ध्यत्यनुगत कार्यस्यानुगतकारणजन्यत्वात् । न तु संयुक्तविशेषणतारूपसंबन्धस्तत्र, तस्य तत्तद्रूपादिरूपत्वेनाननुगतत्वादिति चतुर्थानुमानस्य भावः ।

अतिरिक्तसमवायपक्षे दूषणं तत्परिहारश्च

ननु गुणक्रियादिविशिष्टबुद्धिनिर्वाहकतया यदि समवायसंबन्धाख्योऽतिरिक्तः पदार्थोऽभ्युपगम्यते, तदा घटाभाववद्भूतलमित्यादिविशिष्टबुद्धिरपि पक्षीकृत्य तत्रापि संबन्धिभिन्नसंबन्धकल्पनापत्तिरिति सर्वे शास्त्रान्तरकाराः समवायपक्षं दूषयन्ति ।

अत्रैवं प्रतिविधीयतेऽत्र दूषणस्य विवक्षणं किं प्रतिबन्दीप्रदर्शनपरम् ? उत तद्द्वारा समवायसाधकानुमानेऽप्रयोजकत्वस्यार्थान्तरस्य वोद्भावनम् ? नाद्यः, प्रतिवन्द्या अनुत्तरत्वात् । तथा च शाबरं भाष्य [10]'प्रतिबन्दी खल्वेषा ? न ह्यनया स्वपक्षस्साधितो भवति, परपक्षो दूषितश्च' इति । नापि द्वितीयोऽनुगतकारणं विनानुगतकार्यासंभवस्य विपक्षे बाधकत्वात् । नाप्यर्थान्तरमेकत्वेन लाघवात् समवायस्यैवानुमितिविषयत्वात् । स्वरूपसंबन्धस्य तत्तत्स्वरूपत्वेन नानात्वेन गौरवात् ।

समवायस्य नित्यत्वैकत्वेऽनुपपन्न इति केषांचन तीर्थङ्कराणां दूषणम्

समवाय एक एवेति [11]'तत्त्वं भावेन' इत्यत्र कणादमुनिनाऽसूचि । यथैका सत्ता सर्वत्र सद्बुद्धिप्रवर्तिका तथैक एव समवायः सर्वत्र समवेत-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

बुद्धिप्रवर्तको भवति । अत एव स नित्योऽप्युत्पादविनाशयोस्तस्य प्रमाणाभावात् । तस्यैकत्वेन तन्नाशाभ्युपगमे तन्नाशदशायां नित्ये द्रव्ये द्रव्यत्वादेर्विशिष्टानुभवानुपपत्तेश्च । अतः समवायो नित्य एकश्च । अत एवैवमवाचि[12] "संबन्ध्यनित्यत्वेऽपि न संयोगवदनित्यत्वं भाववदकारणत्वात् । यथा प्रमाणतः कारणानुपलब्धेर्नित्यो भाव इत्युक्तं तथा समवायोऽपीति" इति प्रशस्तपादभाष्ये ।

अत्र शङ्करभाष्यकृद्दूषणम्

अत्र शङ्कराचार्याः—युतसिद्धयोस्संबन्धः संयोगोऽयुतसिद्धयोस्तु समवाय इति वैशेषिकदर्शनम् । तच्च न संभवति । कार्यात् कारणस्य प्राक्सिद्धत्वेनायुतसिद्धत्वानुपपत्तेः । न च कारणातिरेकेणाभावात् कार्यस्यायुतसिद्धिर्भवतु, कारणस्य युतसिद्धिरेव स्यादिति वाच्यम्, संबन्धिद्वयाधीनसद्भावो हि संबन्धो नासत्येकस्मिन्नपि संबन्धिनि भवितुमर्हति । अत एवाभ्यधुरेवं शङ्करभगवत्पादाः । [13]'नापि संयोगस्य समवायस्य वा संबन्धस्य संबन्धिव्यतिरेकेणास्तित्वे किंचित् प्रमाणमस्ति' इति । विस्तरस्तु [14]'अपरिग्रहाच्चात्यन्तमनपेक्षा' इति ब्रह्मसूत्र-व्याख्याने द्रष्टव्यम् ।

भामतीकारदूषणम्

तत्र भामती—संबन्धिनोऽनित्यत्वेन समवायसंबन्धस्याप्यनित्यत्वं युक्तम् । अतो न नित्यः समवायः तदुक्तम्—[15]'अपि च समवायस्यापि संबन्ध्यधीनसद्भावस्य संबन्धिनश्चैकस्य द्वयोर्वा विनाशित्वेन विनाशित्वात् कार्यत्वम् । न ह्यस्ति संभवो गुणो वा गुणगुणिनौ वाऽवयवो वाऽवयवावयविनौ वा न स्तोऽप्यस्ति च तयोस्संबन्धः' इति । अतस्समवायस्य नित्यत्वमनुपपन्नमिति ।

श्रीभाष्यकृद्दूषणम्

अत्र श्रीभाष्यम्—[16]'नित्यमेव च भावात्' इति सूत्रव्याख्यानावसरे, [17]'समवायस्य संबन्धत्वात् संबन्धस्य नित्यत्वे संबन्धिनो जगतश्च नित्यमेव भावादसमञ्जसमिति' भगवद्रामानुजाचार्यैर्न्यगादि । एतद्भाष्यं श्रुतप्रकाशिकाचार्याः[18] 'संबन्धिविनाशविनाशित्वं संयोगे दृष्टमिति सम-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वायस्यापि संबन्धत्वादेव संबन्धिविनाशविनाशित्वोपपत्तेस्तन्नित्यत्वाय संबन्धिजगन्नित्यत्वं स्यात्' इति व्याचक्षाणा यथा सयोगस्य तत्संबन्धिनो नाशान्नाश इष्यते तथा समवायस्यापि संबन्धत्वस्वीकारेण तत्संबन्धिनाशान्नाश एष्टव्य इति तन्नित्यत्वं व्याहन्येतेति प्रत्यपादयन् । अत्र समवायः संबन्धिविनाशाधीनविनाशः संबन्धत्वात् संयोगवदित्यनुमानं विवक्षितम् ।

तर्कताण्डवकारदूषणम्

तर्कताण्डवकारा अपि[19] 'न हि संबन्धनाशेऽपि संबन्धिनः स्थितिवत् संबन्धिनाशेऽपि संबन्धस्थितिः कुत्रचिद् दृष्टा इति ग्रन्थेन पूर्वोक्तमाक्षेपमेव प्राचीकशन् । तथा समवायस्यैकतास्वीकारे वाय्वात्माकाशादावरूपेष्वपि स्पर्शादिसमवायसद्भावेन रूपसमवायस्याप्यपेक्षितत्वाद् रूपवत्ताप्रसङ्गः । तथा चेदं रूपवदिदं नीरूपमिति व्यवस्था भज्येतेति दूषणमप्यभ्यधुस्तर्कताण्डवे ।

उक्तदूषणानां परिहारप्रदर्शनम्

अत्रैवं प्रतिविधीयते-संबन्धिनाशे संबन्धनाश इति यदुक्तं तत् क्वचित् संबन्धिनाशेऽपि संबन्धनाशस्यादर्शनान्न जाघटीति । यथा पुत्रस्य पित्रा साकं पितृपुत्रभावरूपः संबन्धः संबन्धिनि पितरि नष्टेऽप्यनुवर्तते । अत एव नष्टेऽपि पितरि श्राद्धादिष्वधिकरोति ।

एवं समवायस्यैकत्वे रूपिनीरूपव्यवस्था न स्यादिति यत् तदपि दूरोत्सारितम् । वायौ रूपसमवाय-सत्त्वेऽपि रूपं नास्ति । अतो वायू रूपवानिति न प्रतीतिः । घटे तु रूपमप्यस्ति । अतो घटो रूपवानिति प्रतीतिर्भवति । अत्र तु निदानमधिकरणस्वभावो घटवाय्वो रूपिनीरूपप्रतीतिश्चेति मणिग्रन्थाशयः । अतो नोक्तदोषः प्रसजति ।

[20]'वायौ रूपसमवायसत्त्वेऽपि रूपात्यन्ताभावोऽस्ति न घटे । कथमेवम् । अधिकरणस्वभावात् । अबाधितरूपिनीरूपप्रतीतेश्च' इति मणिग्रन्थेन

परिमलोक्तं दूषणम्

अत्र पूर्वोत्तरमीमांसावल्लभा अप्पयदीक्षिताः कल्पतरुपरिमले समवायमेवं दूषयन्ति[21] । अभावस्य यथा प्रतियोग्यनुयोगिभ्यां सह संबन्धः

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

स्वरूपाख्यस्तथाऽवयवावयव्यादीनामपि स्वरूपसंबन्ध एवास्तु किं समवायेन ? गौरवात्। न च समवायपक्षे समवायस्तस्य संबन्धत्वं चेति द्वयमेव कल्पनीयम्। अवयवावयव्यादिषु संबन्धत्वकल्पने तेषामननुगतत्वेन क्रोडीकारकाभावात् संबन्धिभेदेनानन्तानि संबन्धत्वानि कल्पनीयानीति गौरवम्। तस्मात् समवायपक्ष एव लाघवमक्षतमिति वाच्यम्। समवायेऽपि निरूपकभेदेन संबन्धत्वभेदोऽङ्गीक्रियते न वा ? यद्यङ्गीक्रियते तदा समवायपक्षेऽपि तत्तन्निरूपकभेदप्रयुक्तनानासंबन्धत्वकल्पनाया अवश्यम्भावात् समवायाख्यधर्मिकल्पनाप्रयुक्तगौरवमधिकम्। यदि नाङ्गीक्रियते तदाऽवयवादिषु तत्तदभावसंबन्धत्वस्य क्लृप्तस्यैवानयव्यादि संबन्धत्वरूपताया अपि संभवेन संबन्धताया एकस्याप्यकल्पनेन गौरवाभावादिति।

परिमलदूषणप्रतिविधानम्

अत्रैवं प्रतिविधीयते— 'भूतलं घटाभाववत्' इत्यादौ स्वरूपसंबन्धस्थले संबन्धिनोर्मध्ये नैकस्य संबन्धत्वं विनिगमनाविरहात्। किं तु तदुभयसमुदायस्य व्यासज्यवृत्तिपरस्परप्रतियोगिकमेकमेव संबन्धत्वमभ्युपगम्यते। एवं चाभावाधिकरणादिस्वरूपद्वये संबन्धत्वस्य क्लृप्तत्वेऽप्यवयवावयव्यादिस्वरूपद्वये तन्न क्लृप्तम्। तथा च संबन्धत्वस्यापि कल्पनीयत्वाद् गौरवम्।

वस्तुतस्त्वेवमप्यक्लृप्तयोः समवायतद्गतसंबन्धत्वयोः कल्पनापेक्षयैकस्यावयवावयव्यादिस्वरूपद्वयगतस्य संबन्धत्वस्य कल्पने लाघवमिति शङ्कावसरं लभते। अतः प्रकारान्तरेण समाधातुं प्रयतामहे। अस्ति तावदयं घटोऽयं पट इति समूहालम्बनज्ञानादिमे घटा इति ज्ञानस्य प्रत्यक्षरूपस्य शाब्दरूपस्य वा वैलक्षण्यमानुभविकम्, न तदपह्नवमर्हति। तच्च समूहालम्बने विशेष्यताभेदेन प्रकारतानां भेदो, न त्विमे घटा इति स्वीकारेणैव निर्वहति। ततश्च तस्मिन्न् ज्ञाने नानाविशेष्यतानिरूपितैकैव प्रकारता। तन्निरूपिका च संसर्गता समवायस्वीकर्तृभिरेकैव स्वीकार्या। स्वरूपसंबन्धवादिभिस्तु तत्तद्व्यक्तिस्वरूपात्मक-विषयभेदाद् भिन्नैव संसर्गताः

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

स्वीकरणीया इति व्यक्तमिदं गौरवम्। एवं नीलाः पीता इत्यादिष्वपि बोध्यम्। एवमनन्तेषु भूतलादिस्वरूपेषु रूपादिप्रतियोगिकत्वकल्पनापेक्षयैकस्मिन् समवाये तत्कल्पनायां लाघवमक्षतमिति।

मणिकारसमाधानम्

मणिकारस्तु-यदि विशिष्ट-बुद्धेर्विशेषणविशेष्यसंबन्धविषयकत्वमिति नियमं स्वीकृत्य विशिष्टबुद्धिः विशेषणविशेष्यसंबन्धविषया इत्यनुमानेन समवायः साध्येत तदा तादृश-विशिष्टबुद्धिनिरूपितायाः संसर्गताख्यविषयतायाः समवाये स्वीकरणीयतया तस्याश्च निरूपकभेदेन भेदात् तत्कल्पनं समवायाख्यधर्मिकल्पनं चेत्यादयो दोषाः प्रसजेयुः। अतः 'गुणक्रियादिविशिष्टबुद्धिर्विशेषणसंबन्धनिमित्तिका' इत्येवानुमानम्। कारणत्वेन सिद्ध्यंश्च संबन्धो लाघवादेक एव सिद्ध्यति। न च धर्मिकल्पनातो वरं धर्मकल्पनेति न्यायात् कारणत्वमपि क्लृप्तानामेव गुणादिस्वरूपाणामस्त्विति वाच्यमनुगतकार्यस्यानुगतकारणनियम्यत्वाद् गुणादिस्वरूपाणां चाननुगतत्वादित्याशेरते।

अत एव[22] 'इहेदमिति यतः कार्यकारणयोः स समयायः' इति कणादसूत्रमपि विशिष्टबुद्धिहेतुत्वेन समवायसिद्धिमभिप्रैति। यतः स इति पदस्वारस्यात्। ततश्च कारणत्वेन समवाये सिद्धे तत्र निरूपकभेदेन नानासंबन्धत्वकल्पना प्रयुक्तगौरवमपि फलमुखगौरवस्यादोषत्वादिति न्यायेन न दोषमावहतीति मणिकृतामाशयः।

अयुतसिद्धत्वपरिष्कारः

अथेदानीमयुतसिद्ध्योराधाराधेययोरिहप्रत्ययहेतुः संबन्धः समवाय इत्यत्रायुतसिद्धत्वे नाम किमिति किंचिद् विवृणुमः।

तत्र प्रशस्तपादमतम्

अत्र प्रशस्तपादभाष्यम्—नित्ययोः संबद्धयोर्द्वयोः पदार्थयोः पृथग्गतिमत्त्वमन्यतरस्य वा गतिमत्त्वं युतसिद्धिः। यथा द्वयोः परमाण्वोः संयोगिनोः पृथग्गतिमत्त्वं, यथा वा परमाण्वाकाशयोः संयोगिनोर्मध्येऽन्यतरस्य परमाण्वोः पृथग्गतिमत्त्वं युतसिद्धिः। अनित्ययोः पृथगाश्रयाश्रित-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

त्वमेव युतसिद्धिर्यथा घटपटयोः। तथा च उक्तविधयुतसिद्धयभावोऽयुतसिद्धिरिति पर्यवस्यति। तथा चायं ग्रन्थः[23] 'सा पुनर्द्वयोरन्यतरस्य वा पृथग्गतिमत्त्वं पृथगाश्रयाश्रयित्वं च' इति। अत्र पृथगाश्रयाश्रयित्वमित्यनेन संबन्धिभ्यामन्योन्य आश्रयस्तदाश्रितत्वं विवक्षितम्। तथा च पटशौक्ल्ययोः पृथग्गतिमत्त्वमपि नास्ति पृथगाश्रयाश्रितत्वमपि नास्ति। यद्यपि पटस्याश्रयस्तन्तवः शौक्ल्यस्य पट इत्येवमाश्रयभेदो वर्तते, तथापि शौक्ल्यस्याश्रयभूतः पटः संबन्धो न तदन्य इति संबन्धिभिन्नाश्रयाश्रितत्वं नास्ति। तथा च न कोऽपि दोष इति।

न्यायकन्दलीकारमतम्

संबन्धिभिन्नाश्रयाश्रयित्वं युतसिद्धिरित्यभिप्रायेणैव श्रीधराचार्या[24] 'यत्र तु द्वयोरपि संबन्धिनोः परस्पर-परिहारेण व्यतिरिक्ताश्रयाश्रयित्वं तत्र युतसिद्धिः' इत्यवोचन् न्यायकन्दलयाम्।

तत्र भामतीकारदूषणम्

तत्र भामती—[25]'अपरिग्रहाच्चात्यन्तमनपेक्षा' इति ब्रह्मसूत्रशाङ्करभाष्यं विवृण्वाना भामतीकृतः 'यदि तु संयोगिनोः कार्ययोः संबन्धिभ्यामन्यदेशत्वं युतसिद्धिस्ततोऽन्यायुतसिद्धिः'[26] इति वैशेषिकमतमन्ववादिषुः। तथा चोक्तरीत्यायुतसिद्धत्वपरिष्कारे शाङ्करभाष्योक्तो दोषो न प्रसजति। अत एवोक्तरीतिमत्परिष्कारादरे शाङ्करभाष्योक्तदोषा न प्रसजन्तीत्यभ्युपगम्य समवायसिद्धौ दूषणान्तरं व्यधायि [27]'पृथगाश्रयाश्रयित्वपृथग्गतिमत्त्वलक्षणयुतसिद्धेरन्या त्वयुतसिद्धिः। यद्यपि नाभ्युपेतविरोधमावहति; तथापि न सामानाधिकरण्यप्रथामुपपादयितुमर्हति' इत्यादिना भामत्याम्। गुणगुणिनोर्यदि समवायः संबन्ध इत्यभ्युपगम्यते तदा घटपटौ संयुक्ताविितिवद् गुणगुणिनौ संबद्धाविति प्रत्ययः स्यात्, न तु शुक्लः पट इत्यादिर्गुणगुणिनोस्तादात्म्यविषयकः प्रत्ययो भवेत्। गुणगुणिनोस्तादात्म्य-विषयकप्रत्ययोपपादनाय हि समवायोऽभ्युपेयते भवद्भिः। स चेदभ्युपेतोऽपि तादात्म्यप्रत्ययं न घटयेत् किं समवायकल्पनयेति दूषणसारः।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तत्र समाधानम्

अत्रैवं प्रतिविदध्महे—यदि गुणगुणिनोरभेदः स्यात् तर्हि शुक्ल इति बुद्ध्यैव पटस्यापि विषयीकृतत्वात् पट इति बुद्धिरनवसरा स्यात्। किं च शुक्लशब्दपटशब्दयोरेकार्थत्वेन पर्यायतया तरुवृक्षशब्दवत् सहप्रयोगो न स्यात्। पटमानयेत्युक्ते यत्किंचिच्छुक्लमानयेत्, पटस्य शुक्लाभिन्नत्वात्। तथाऽशुक्लः पट इति प्रतीतिर्न स्यात् शुक्लाभिन्नपटे शुक्लभेदस्य बाधितत्वात्। तथाऽन्धस्य त्वगिन्द्रियेण पटोऽयमिति ज्ञानं यथा भवति तथा शुक्लोऽयमित्यपि ज्ञानं स्यात्। यद्वाऽन्धस्य शुक्लज्ञानं यथा न भवति तथा पटज्ञानमपि न भवेत्। अतो युक्तिविरुद्धत्वाच्छुक्लपटयोरभेदो नोपपद्यत इति युक्तिसहकृतं शुक्लः पट इति प्रत्यक्षं पटशुक्लयोर्भेदमेव बोधयति। सर्वमेतन्मनसि निधाय तात्पर्यटीकायां[28] 'शुक्लः पट इत्यादि सामानाधिकरण्यज्ञानं न तु संबन्धिज्ञानमिति चेत् ? किं पुनरिदं सामानाधिकरण्यम् ? तादात्म्यमिति चेन्न, द्वितीयबुद्धिव्यपदेशयोः पौनरुक्त्यात्। अपौनरुक्त्यं चाभिमन्यन्ते प्रतिपत्तारो, यदन्यतरदुपलभ्यान्यद् बुभुत्सन्ते' इति प्रण्यगादि। एवमेव परिशुद्धौ [29]'तर्कसहायं प्रत्यक्षमेव पटशुक्लत्वयोर्भेदमाकलयति' इत्यभ्यधायि। एवं [30]'तस्मान्नीलो घट इत्यत्र नीलसंबन्ध एव भासते। मतुपो लोपादभेदोपचाराद्वा' इति मणिग्रन्थोऽत्रानुसन्धेयः।

भामतोक्तं दूषणान्तरम्

एवमन्यदपि दूषणं भामत्यामुपलभ्यते समवायवादिनामुपरि। तथा हि—नित्ययोर्विभुनोश्चात्माकाशयोर्योजोऽनुत्पत्तिमान् संयोगस्तत्राप्ययुतसिद्धिर्वर्तते। निष्क्रिययोर्निराश्रययोश्चात्माकाशयोः पृथग्गतिमत्त्वरूपस्य पृथगाश्रितत्वरूपस्य वा युतसिद्धत्वस्याभावात्। तथा चामुतसिद्धयोस्तयोः संयोगेऽपि समवायलक्षणसत्त्वादतिव्याप्तिरिति। एतच्च[31] 'नित्ययोरात्माकाशयोरजसंयोग उभयस्या अपि युतसिद्धेरभावात्' इति ग्रन्थेन भामत्यां प्रत्यपादि।

तत्र समाधानम्

अत्रैवं समादध्महे—अयुतसिद्धयोराधार्याधारयोरिहप्रत्ययहेतुः संबन्धः समवाय इति हि लक्षणम्। आत्माकाशयोरुक्तरीत्याऽयुतसिद्धयोरप्याधाराधेयभावविरहान्नातिव्याप्तिः।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विभुद्वयसंयोगनिराकरणम्

किं च विभुपदार्थयोः संयोगस्यैवानभ्युपगमान्न कोऽपि दोषः। न च विभुद्वयसंयोगस्यानुमानमेव मानमाकाशमात्मसंयोगि मूर्तद्रव्यसंयोगित्वादिति वाच्यं निष्क्रियत्वान्नित्यत्वाच्च। संयोगजान्यतरकर्मजोभयकर्मजरूपत्रिविधस्यापि संयोगस्यानुपपत्तेस्तत्र। अत एव न्यायकन्दल्याम्[32] 'अस्ति च तेषां संयोग आकाशममूर्तेनापि द्रव्ये समं संयुज्यते मूर्तद्रव्यसंयोगित्वात् पटवदित्यनुमानात् प्रतीतेः। स चाकारणान्नित्यं तस्मादनुपपन्नमिदम्। अजस्संयोगो नास्तीति' इति विभुद्वयसंयोगो निराकारि।

[33]नीतितत्त्वाविर्भावविमर्शः

एतेन विभुद्वयसंयोगप्रतिपादनपरनीतितत्त्वाविर्भावाजसंयोगवादो ऽनुपपन्नत्वान्निरस्तः।

न्यायमतानुगाः प्राभाकरा इति निरूपणम्

एतावता नैयायिकैर्वैशेषिकैर्वा प्रसाधितोऽयं समवायः प्राभाकरैरपि तथैवान्वसारीत्यत्र न कापि विप्रतिपत्तिर्दार्शनिकानाम्। तथाहि—[34]'इहेदमिति यतः कार्यकारणयोस्ससमवायः' इति हि काणादं सूत्रम्। सूत्रमिदं प्रशस्तपादैः[35] 'अयुतसिद्धानामाधाराधेयभूतानां यस्संबन्ध इहेतिप्रत्ययहेतुस्स समवाय' इति व्यवारि। इदमेव विचिन्वानः शालिकाचार्यः[36] 'प्रतीत्य ह्याधारमाधेयं च संबन्धं प्रतीयात्' इति न्यरूपयत्।

अपि च पृथग्गतिमत्त्वं पृथगाश्रयाश्रितत्वं च युतसिद्धिस्तद्विपरीताऽयुतसिद्धिरिति प्रशस्तपादोऽभ्यधात्। प्रकरणपञ्चिकाव्याख्याता नारायणोऽप्येतदेव पक्षं न्यायसिद्धौ सविस्तरमुपास्थापयत्। एवं गुणगुणिनोर्भेदो यथा न्यायवैशेषिकग्रन्थयोर्निरूपितस्तथैव गुरुमतानुगैरपि स्वीकृतः। तदाह प्रकरणपञ्चिकाकारः[37]—'इयं च भेदसाधने युक्तिरन्वयव्यतिरेकाभ्यां हि वस्त्वन्तरमवसीयतेऽवगम्यमानोऽपि चावयवी विलक्षणबुद्धिगोचरतामावहत्येन' इत्यादिग्रन्थेन। अवयवाद् भिन्नोऽवयवी, तदनुपलम्भेऽप्युपलभ्यमानत्वात्, कुड्यघटवदवयवी भिन्नस्तेषां बहुत्वे सत्येकत्वेनाबाधितप्रत्ययवेद्यत्वात् स्थूणासु वंशवदित्याद्यनुमानमत्र विवक्षितम्। अत एवं प्रतीमो गुरुमतस्थ समवायराद्धान्ते वैशेषिकमतमेव मूलमिति।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

परं तु गुरुमतानुयायिनः समवायस्य नानात्वं नित्यगतस्य नित्यत्वमनित्यगतस्यानित्यत्वमिति च वर्णयन्ति। तदाहुः—[38]'समवायं च न वयं काश्यपीया इव नित्यमुपेमः' इति।

गुरुमताभिमतसमवायनानात्वनिराकरणम्

तदेवं निराक्रियते। समवायो नित्य एकश्च। तदाह कणभक्षः[39] 'तत्त्वं भावेन' इति। अयं भावः—तत्त्वं नाम तद्व्यक्तित्वमेकमात्रव्यक्तिकत्वमिति यावत्। यथा द्रव्यं सद् गुणस्सन् कर्म सदित्येकाकारप्रतीतिविषयत्वान्नानात्वसाधकप्रमाणाभावाल्लाघवाच्चैकैव सत्ता, तथा घटः समवेतः पटः समवेत इत्याद्यनुगतप्रतीतिविषयत्वाद् भेदकप्रमाणाभावाल्लाघवाच्च समवायोऽप्येक एवेति सिद्धम्। स च नित्यः। तस्योत्पादविनाशयोः प्रमाणाभावात्, तत्कल्पने कल्पनागौरवात्। किं च समवायस्यैकत्वेन तन्नाशाभ्युपगमे तन्नाशदशायां नित्ये द्रव्ये द्रव्यत्वादेः विशिष्टानुभवानुपपत्तेश्च।

लघुमञ्जूषाखण्डनम्

यत्तु गुणगुण्यादीनां भेदं समवायस्यातिरिक्तपदार्थत्वं च स्वीकृत्य

'[40]समवायोऽपृथग्भावो द्रव्यादीनां[41] गुणैर्मतः।
स नित्यो यत्र हि द्रव्यं न तत्रानियतो गुणः॥'

इति चरकवाक्यं प्रमाणतयोपादाय नित्यद्रव्यतद्गुणयोः समवायो नित्यः। अन्यत्र नित्य इति समवायानेकत्वं स्वीकृतं नागेशभट्टेन। तदपि पूर्वोक्तदिशा निराकृतम्।

उपसंहारः

विदितमेतद् दार्शनिकानां यन्न्यायसूत्रभाष्यवार्तिकादौ समवायमधिकृत्य किंचिदपि नासूच्यपि तु तात्पर्यटीकापरिशुद्ध्यादौ प्रास्तावीति। अत एव प्राचीनन्यायग्रन्थेषु किं बहुना मणिग्रन्थात् प्राचीनग्रन्थेषु समवायो नाभ्यधायि। तत्रेदम्प्रथमतया गङ्गेशोपाध्यायेनैव तत्त्वचिन्तामणिग्रन्थ समवायवादाख्यं प्रकरणमेकं विधायानितरसाधारणैर्युक्तिगणैः सम-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वायो न्यरूपोत्येतदतिरोहितं विदितप्राच्यनव्यन्यायग्रन्थानाम् । एतेषामपि वैशेषिकदर्शनमेवात्र प्रमाणभूतमित्यत्र न कापि संशीतिः ।

समवायसिद्धान्तोपर्यापातदूषणानि दुदूषयिषामात्रेण कैश्चित् तैर्थिकैः प्रत्यपादिषत । तेषु केषाञ्चन परिहारं वयमेव पूर्वं प्रादीदृशाम । अवशिष्टान्यपि मणिदीधित्यादिग्रन्थाभ्यासजनितवासनावासितान्तःकरणैः सुलभं समाधेयानीति विस्तरभिया नेह प्रतन्यते ।

---

1. वैशेषिकसूत्रम् 7-2-26
2. उपस्कारः 7-2-26
3. वैशेषिकसूत्रम् 4-1-13
4. ,, 9-1-15
5. ,, 9-1-14
6. ,, 10-2-3
7. ,, 10-2-4
8. ,, 7-2-28
9. तत्त्वचिन्तामणिः 651
10. शाबरभाष्यम्
11. वैशेषिकसूत्रम् 7-2-28
12. प्रशस्तपादभाष्यम् 782
13. शाङ्करभाष्यम् 521
14. ब्रह्मसूत्रम् 2.17
15. भामती 512
16. ब्रह्मसूत्रम् 2-2-13
17. श्रीभाष्यम् 510
18. श्रुतप्रकाशिका पृ० 510
19. तर्कताण्डवम् 478
20. तत्त्वचिन्तामणिः 673
21. कल्पतरुपरिमलः 511
22. वैशेषिकसूत्रम् 7-2-26
23. प्रशस्तपादभाष्यम् 360
24. न्यायकन्दली 362

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

25. ब्रह्मसूत्रम् 2-2-17
26. भामती 518
27. „ „
28. न्यायवार्तिकतात्पर्यटीका I-1-4
29. तात्पर्यटीकापरिशुद्धिः 1-1-4
30. तत्त्वचिन्तामणिः पृ० 680
31. भामती 518
32. न्यायकन्दली 362
33. नीतितत्त्वाविर्भावः पृ० 64
34. वैशेषिकसूत्रम् 7-2-26
35. प्रशस्तपादभाष्यम् पृ० ३७
36. प्रकरणपञ्चिका पृ० 94
37. „ पृ० 85
38. „ पृ० 92
39. वैशेषिकसूत्रम् 7-2-28
40. चरकसंहिता 1-50
41. भूम्यादीनामिति पाठान्तरम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सांख्यशास्त्रीया आधुनिकविज्ञानाभिमताः केचन सिद्धान्ताः

—डा० सुद्युम्नाचार्य

दर्शनशास्त्रेषु सांख्यशास्त्रदमद्यापि समं चकास्ति। सर्वेऽपि जना आदेवमानुषं दार्शनिकतत्त्वज्ञानाय सांख्यशास्त्रे नामं नामं सम्मानं विदधति। पारमर्षमिदं ज्ञानं प्रतियुगमप्रतिहतमिति शंकराचार्यप्रभृतिभिः स्मर्यते[1]। प्राचि प्रचलितास्ते सांख्यशास्त्रोक्ताः सिद्धान्ता आधुनिके वैज्ञानिके युगेऽपि समं प्रथन्ते। अद्यत्वे बहुविधैः प्रयोगैः परीक्षिताः सुस्थापिताश्च वैज्ञानिकाः सिद्धान्ताः सांख्यं शास्त्रं संवदन्तीति कस्य नास्ति सुखावहमाश्चर्यम् !! लेखेऽस्मिन् कतिपय आधुनिकविज्ञानसंवादिसिद्धान्ताः संक्षेपेणोपवर्ण्यन्ते।

१. प्रकृतेर्वैषम्येण जगतः सर्गः

जगतः सर्गकारणविषये दार्शनिकेष्वनेके प्रवादाः प्रचलिता दृश्यन्ते। वेदान्तदर्शने हि "तस्येश्वरस्येक्षणमात्रेणैव जगदुत्पन्नमि"ति महता सम्भारेणोपवर्ण्यते। "तदैक्षत बहु स्यां प्रजायेये"त्यादीनि बहूनि सर्वज्ञेश्वरकारणपराण्यौपनिषदानि वाक्यानि तत्रोदाह्रियन्ते।

सांख्यदर्शने तु "प्रकृतेर्वैषम्येण जगतः सर्ग" इत्याधुनिकविज्ञानसंवादिनयो घण्टापथमुपयाति। तथा हि "सत्त्वरजस्तमसां साम्यावस्था प्रकृतिः" (सांख्यसूत्रम् १।६१) इत्यादिसूत्रेण प्रकृतिः साम्यावस्थायां न कस्यचिदुत्पाद इति ध्वनितम्। 'साम्यवैषम्याभ्यां कार्यद्वयम्' (सांख्यसूत्रम् ६।४२) इति सूत्रेण तु प्रकृतेर्वैषम्येण जगतः सृष्टिरिति मुक्तकण्ठमुपवर्णितम्।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

एवं यदा प्रकृतेर्गुणा न्यूनाधिकभावमापन्नाः गुणप्रधानभावं भजन्तेऽथ च तेन भावेनोपमर्द्योपमर्दकभावो वरीवृत्यते तदैव जगत्सर्गो भवति[२]। एवं च न्यूनाधिकभावे सति परस्परमुपमर्दयन्तस्ते गुणा असंख्यान् विकारानाविर्भावयन्ति।

कापिलस्सिद्धान्त एष आधुनिकविज्ञानं संवदति। तस्मिन् सिद्धान्ते पदार्थेषु क्रिया, क्रियातश्च विकाराणां सृष्टिर्घातप्रतिघातादिभिर्व्याख्या-यते। घातप्रतिघातादित्वं च वैषम्यकारणकमेवेत्यतो वैषम्यं सिद्धं भवति।

अणु परमाणुष्वाकर्षणं विकर्षणं वा स्यात् तरङ्गेषु च संकोचः प्रसारो वा। सर्वत्र वैषम्यस्यैव स्वाराज्यं दृश्यते केवलम्। ऋणावेशिता धनावेशिताश्चाणवः परस्परं वैषम्यं प्राप्ता विकर्षणादिकं विदधते। अण्वादिगतीनां सर्वमपि रहस्यमस्मिन् वैषम्ये समाविष्टम्। जले वीचितरंगन्यायो, धनुषश्च ज्यायां, "पेंडुल"मित्याख्ये द्रव्ये च तरङ्गगति-र्वैषम्येणैव सम्पद्यते। यदैव तत् "पेंडुलम्" (Pendulum) साम्यावस्थामुप-याति, तदैव क्रियाया अभावस्तत्र सम्पद्यते। भौतिकविज्ञाने बह्व्यो गतयस्तरङ्गगतिभिरेवं च वैषम्येण व्याख्यायन्ते। न्युटनमहोदयस्य गतेस्तृतीये नियमे क्रियाप्रतिक्रियानियमस्य वर्णनं वैषम्यस्यैव व्याख्यान-मिति नास्त्यविदितम्। किमपि द्रव्यं वेगेनाभिहतं वैषम्यप्राप्तं तथैव प्रतिक्रियां विधत्त इति वस्तुतो वैषम्यसिद्धान्तस्यैव विस्तरः।

अद्यत्वे विज्ञानस्य विभिन्नासु शाखासु वैषम्यं विरोधो वा (Contradiction) विविधानां क्रियाणां कारणरूपेण व्याख्यायते[३]। अत एव वैषम्येण जगतः सर्ग इति सर्वथाऽवदातम्।

२. दिने चन्द्रतारकाः कथं विलुप्यन्ताम्

एवमुदिते सूर्ये आकाशमण्डिताश्चन्द्रतारकाः क्व विलुप्यन्त इति प्रश्नस्य समाधानाय विज्ञानसंवादिसिद्धान्तः सांख्यशास्त्रे प्राप्यते। पुराकाले तु तथ्यमप्रतिपन्ना जना घटनामिमां दृष्ट्वाऽचित्रीयिषतावादिषु-रचैवम् "क्व दिवा भृशा भवन्ति"

—पाणिनीये ३.१.१२ सूत्रे महाभाष्य-प्रोक्तमुद्धरणम्

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

"ये रात्रौ भृशालोकाश्चन्द्रतारकास्ते दिवसे क्व गच्छन्तीति हि तस्यार्थः।"

आलोके सति वस्तूनि सम्यग् दृश्यन्ते। चन्द्रतारकास्तु दिने, महति सूर्यालोके प्रतीपं भजन्तो दृष्टि-पथान्निरुध्यन्त इति सत्यमाश्चर्यंचमत्कार आसीत्तदानीम्।

सांख्यं शास्त्रन्तु रहस्यमदः सहजं समुदघाटयत्। तत्र चक्षुषा पदार्थस्यानुपलब्धेरष्ट कारणान्यञ्जसा समुपदर्शितानि[4]। तेष्वन्यतमं कारणं वर्तते—"अभिभवात्"। अर्थममुं व्याचक्षाणस्तत्त्वकौमुदीकार एवं प्राह,

"अभिभवाद् यथाऽह्नि सौरीभिर्भाभिरभिभूतं ग्रहनक्षत्रमण्डलं न पश्यति" (सांख्यतत्त्वकौमुदी श्लोके)

एतेन सिद्ध्यत्येवं यत् सौर्येण प्रकाशेन मन्दप्रकाशाश्चन्द्रतारका अभिभूयन्ते, न तु विलुप्यन्ते। यथा सर्वरात्रं ध्वान्तं ध्वंसयन् शोभनार्चिष्कः प्रदीपोऽपि सूर्य उदिते विगतप्रभः सम्पद्यते। चन्द्रतारकयोर्लुप्तप्रभत्वं च कथाया एतस्या नातिभिन्नम्।

एवं तृणप्रचये विनिहितास्तृणसदृशेन हरितेन वर्णेनोपरञ्जिताः कीटा अपि स्वविरोधिकीटानामक्षणः परमुपयान्ति। वस्तुतस्समानहरित-वर्णैरभिभूतास्तेऽन्तरीयन्ते, तेषां बलवत्कीटानां मृत्युमुखात् प्रमुच्यन्ते च। अत्राभिभाव्यत्वं नाम समानवर्णप्रभवम्। एवं बलवत्प्रकाशवता सूर्येण प्रदीपो गाढवर्णवता तृणेन च तत्समानाल्पवर्णोपरञ्जितः कीटोऽभिभूयते, दृष्टिपथाच्च विलुप्यत इति सर्वमवदातम्।

३. अग्नेरूर्ध्वज्वलनं कथं सम्पद्यताम्

"अग्निः कथं ज्वलति, कथं च स ऊर्ध्वं व्रजती"त्यप्यासीत् प्राचि प्रचलितः प्रश्नः। सर्वाणि वस्तून्यधः पतन्त्यग्निस्तु दिवं गन्तुकाम इवोर्ध्वं व्रजति। अस्यापि प्रश्नस्य समाधानाय महाभाष्यकारः पुरा प्रशंसितं वाक्यमिदमुदाजहार,

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

"ज्योतिषो विकारोऽचिराकाशदेशे सुप्रज्वलितं नैव तिर्यग्गच्छति, नार्वागारोहति । ज्योतिषो विकारो ज्योतिरेव गच्छत्यान्तर्यतः" ।

—पाणिनीये 1.1.50 सूत्रे महाभाष्यम् ।

सर्वाणि वस्तूनि स्वप्रकृतिद्रव्यं प्रति गन्तुमुत्सहन्ते । एवं पार्थिवाप्यानि द्रव्याण्युपरि क्षिप्तान्यपि पृथिवीं, जलं च स्प्रष्टुमधो व्रजन्ति । अग्निस्तु मूलतो दिवः प्रभूतस्तत्रैव वासं कल्पयितुमूर्ध्वं व्रजति ।

परं नैतन्मतमाधुनिकविज्ञानविचक्षणानां चेतसि चमत्कारमाविष्करोति । अग्नौ नास्ति चित्तं, येन स कंचन प्रेमाणं वा द्वेषं वा विदधीत । स तु विशुद्धं भौतिकशास्त्रनियममनुसरन् क्रमते । नियमोऽयं सांख्यतत्त्वकौमुद्यामेवं प्राकाश्यत

"तत्र कार्योद्गमने हेतुर्धर्मो लाघवं, गौरवप्रतिद्वन्द्वि, यतोऽग्नेरूर्ध्वज्वलनं भवति । तदेव लाघवं कस्यचित्तिर्यग्गमने हेतुर्भवति, यथा वायोः" ।
(सांख्यतत्त्वकौमुदी श्लोकः १३)

एतद्धि वस्तुतो विज्ञानसंवादि कथनम् । लाघवाद् वस्तून्युपरि गच्छन्ति, गौरवाच्चाधः पतन्ति । अग्नेर्लघुत्वं वायोर्लघुत्वादधिकतरम् । अतो वायुरग्निं पीडयितुं न क्षमते । एवं च केनाप्यपीडितोऽग्निरूर्ध्वं व्रजति । अग्निसमीपस्थो वायुरप्यूष्मताप्रभावाल्लघुः सम्पद्यते । अत एव सोऽप्युपरि व्रजति । अन्यत्र स्थितो गुरुवायुस्तु तस्य स्थानपूरणाय तत्र सत्वरं व्रजति । एवं वायोर्गमनागमनविधयाग्निं परितः करीषंकषा वात्या परिचालिता भवति । महत्यग्निव्यूहे महता वेगेन समन्ताद् वायुप्रचलनस्यास्त्येतदेव कारणम् ।

एवं वायोस्तिर्यग्गमनमपि लघुताहेतुकम् । निदाघकाले सूर्योष्मविधया वायोरणवो विच्छिन्ना असंहता वा सम्पद्यन्ते । एवमसंहतो वायुर्लघुर्भूत्वोपरि व्रजति । तस्य निवातस्थानस्य परिपूरणायान्यत्र स्थितो गुरुवायुर्वेगेन निवातप्रदेशं प्रति गच्छति । एवं च वायोरूर्ध्वगमनं तिर्यग्गमनं च सम्पद्येते । सर्वमपीदं गमनं लघुताप्रभवम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अद्यत्वे "गुब्बारा"-मध्ये वायोरपि लघुतरो "गैस" इत्याख्यो वायुः परिपूर्यते। एवं लघुभूतोऽसौ गुरुभूतं वायु विस्थापयन्नूर्ध्वं गन्तुमुत्सहते। अतस्सुष्ठूक्तं विदां वरेण सांख्यकारेण यल्लाघवाद्धेतोर्वाय्वग्नी ऊर्ध्वं व्रजतः।

संदर्भ—

1. कपिलप्रभृतीनां चार्षं ज्ञानमप्रतिहतं स्मर्यते —वेदान्तसूत्रे शांकरभाष्यम्। 2.1.1
2. समुदयश्च गुणानां न गुणप्रधानभावमन्तरेण सम्भवति, न च गुणप्रधानभावो वैषम्यं विना, न च वैषम्यमुपमर्द्योपमर्दकभावादृते···

   —सांख्यतत्त्वकौमुदी 16 (श्लोके)
3. The real universe is full of contradicitions—the contradiction of attraction and repulsion studied by physics, of the association and dissociation of atoms studied by chemistry, of the process of life and of the relationship of organism with enviroment studied by biology. —Dialectical materialism p. 86
4. अतिदूरात् सामीप्यादिन्द्रियघातान्मनोऽनवस्थानात्।
   सौक्ष्म्याद् व्यवधानादभिभवात् समानाभिहाराच्च।

   —सांख्यकारिका 7 (श्लोकः)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अलङ्कारशास्त्रस्य व्याकरणादि-शास्त्रान्तरैः सम्बन्धः

—डॉ० के. गायत्री देवी

संस्कृतवाङ्मयेऽलङ्कारशास्त्रं व्याकरणाद्यङ्गषट्कापेक्षयाऽतिरिक्तं सप्तमं वेदाङ्गमिति परिगण्यते। आन्वीक्षिक्यादिविद्यानिष्यन्दरूपमलङ्कार-शास्त्रमान्वीक्षिकी-त्रयी-वार्ता-दण्डनीतिरूपचतुर्विद्यातिरिक्तं सत् पञ्चमी विद्येति परिकीर्त्यते। अत्र तत्रभवतो राजशेखरस्य वाक्यानि परिशीलन-मर्हन्ति—

उपकारत्वादलङ्कारः सप्तममङ्गमिति यायावरीयः। ऋते च तत्स्वरूपपरिज्ञानाद् वेदार्थानवगतेः।

पञ्चमी साहित्यविद्येति यायावरीयः। सा हि चतसृणां विद्यानां निष्यन्दः।

सकलविद्यास्थानैकायतनं पञ्चदश काव्यविद्यास्थानमिति यायावरीयः।[1]

चतुर्दशाष्टादशप्रस्थानभिन्नानां विद्यानां सहभावात्मकमलङ्कार-शास्त्रं साहित्यशास्त्रमिति व्यपदिश्यते। अलङ्कारशास्त्रं काव्यस्वरूपगुण-दोषालंकारविवेचनपुरस्सरं काव्यसौन्दर्ये व्युत्पत्तिमादधाति। काव्यसौन्दर्य-विवेचनपराणामालंकारिकाणां सर्वेषां शास्त्राणां परिशीलनमपेक्षितमा-पतति। इत्थं काव्यसौन्दर्यविवेचकस्यालङ्कारशास्त्रस्य व्याकरणादि-शास्त्रान्तरैः सह निकटः संपर्कोऽवश्यमपेक्ष्यते।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अलङ्कारव्याकरणशास्त्रयोः सम्बन्धः

अलङ्कारशास्त्रस्य व्याकरणशास्त्रेण सह संबन्धः सन्निहितः। आलंकारिकाणां ध्वनिर्व्यङ्ग्यो वा वैयाकरणानां स्फोटेन समानो वर्तते। ध्वन्यालोक आनन्दवर्धनाचार्येण प्रतिष्ठापितो ध्वनिसिद्धान्तो वैयाकरणानां स्फोटवादेन प्रभावितो दृश्यते। स्फुटत्यस्मादर्थ इति स्फोट इति व्युत्पत्त्या प्रवृत्तः स्फोटसिद्धान्तोऽनश्वरशब्दसिद्धान्तो वर्तते।

अवङ् स्फोटायनस्य[2]

इत्यस्य पाणिनेः सूत्रस्याधारेण स्फोटसिद्धान्तः पुरातन इति कथयन्ति विमर्शकाः।

स्फोटरूपाविभागेन ध्वनेर्ग्रहणमिष्यते[3]

इति स्फोटाभिन्नतया ध्वनिमङ्गीकुर्वन्ति वैयाकरणाः।

एतदेवालङ्कारिकैरङ्गीक्रियते। ध्वन्यालोके समासोक्त्याद्यलङ्कारापेक्षया ध्वनेर्भिन्नविषयत्वं प्रदर्शयतानन्दवर्धनेन "सूरिभिः कथित" इति ध्वनिलक्षणवाक्यांशं विशदयता

"सूरिभिः कथित इति विद्वदुपज्ञेयमुक्तिः।
न तु यथाकथंचित् प्रवृत्तेति प्रतिपाद्यते॥

प्रथमे हि विद्वांसो वैयाकरणा व्याकरणमूलत्वात् सर्वविद्यानाम्। ते च श्रूयमाणेषु वर्णेषु ध्वनिरिति व्यवहरन्ति। तथैवान्यैस्तन्मतानुसारिभिर्वाच्यवाचकसम्मिश्रः शब्दात्मा काव्यमिति व्यपदेश्यो व्यञ्जकत्वसाम्याद् ध्वनिरित्युक्तः।[4]

इत्युपस्थाप्यते वृत्तिवाक्यम्। एतद्व्याकुर्वंस्तत्रभवाँल्लोचनकारोऽभिनवगुप्तपादाचार्यः प्रथितस्य वैयाकरणस्य भगवतो भर्तृहरेः

यः संयोगवियोगाभ्यां करणैरुपजन्यते।
स स्फोटः शब्दजाः शब्दा ध्वनयोऽन्यैरुदाहृताः॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

इत्येतद्वाक्यमुद्धरति कथयति च

एवं घण्टादिनिर्ह्लादस्थानीयोऽनुरणनात्मोपलक्षितो व्यङ्ग्योऽप्यर्थो ध्वनिरिति व्यवहृतः[5]

इति । मम्मटेनाप्युत्तमकाव्यलक्षणम्

"इदमिति काव्यम् । बुधैर्वैयाकरणैः प्रधानभूतस्फोटरूपव्यङ्ग्यव्यञ्जकस्य शब्दस्य ध्वनिरिति व्यवहार कृतः, ततः तन्मतानुसारिभिरन्यैरपि न्यग्भावितवाच्यव्यङ्ग्यव्यञ्जनक्षमस्य शब्दार्थयुगलस्य" ।[6]

इति स्पष्टीक्रियते । अनेन वाच्यवाचकसंमिश्रशब्दात्मनः काव्यस्य ध्वनित्वमालङ्कारिकाणां संमतमित्यायाति । तथा च साहित्यशास्त्रे ध्वनिसिद्धान्तो वैयाकरणस्फोटवादमूलमिति वक्तव्यं भवति—

किं च शब्दानां सङ्केतितार्थे वैयाकरणमतमालंकारिका आद्रियन्ते । शब्दानां तदुपाधौ सङ्केत इति वैयाकरणानां मतमेव तत्र भवता काव्यप्रकाशकारेणोक्तम् ।

न हि गौः स्वरूपेण गौर्नाप्यगौर्गोत्वाभिसंबन्धात्तु गौरिति भर्तृहरिवाक्यम् ।

"गौः शुक्लश्चलो डित्थ इत्यादौ चतुष्टयी शब्दानां प्रवृत्तिः"[7]

इति पतञ्जलिवचनं च प्रमाणतयोपन्यस्यते ।

एवं शब्दीव्यञ्जनानिरूपण आलङ्कारिकैर्वैयाकरणानुमतान् संयोगादीनभिधानियामकत्वेनाङ्गीकुर्वन्ति ।

काव्यदोषप्रकरणे च्युतसंस्कारदोषमुपपादयन्तोऽलंकारप्रकरण उपमाप्रभेदान् निर्दिशन्तश्च मम्मटाचार्यप्रभृतय अलंकारिका वैयाकरणसिद्धान्तानङ्गीकुर्वन्ति । रीतिं काव्यात्मानं मन्यमानो वामनाचार्यः स्वग्रन्थे शब्दशुद्धिप्रकरणं संयोज्य वैयाकरणसिद्धान्तानुरोधेन महाकविप्रयोगाणां साधुत्वं विमृशति ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अनेनैतद्वक्तुं शक्यते यदलंकारशास्त्रे व्याकरणशास्त्रस्य वर्तते महान् प्रभाव इति ।

अलंकारन्यायशास्त्रयोः संबन्धः

अलङ्कारशास्त्रं न्यायशास्त्रेणापि प्रभावितं दृश्यते । आलङ्कारिकाणां लक्षणाया नैयायिकानां लक्षणायाश्च सम्बन्धो महान् । पण्डितराजो जगन्नाथो लक्षणां "शक्यसम्बन्धो लक्षणा" इति लक्षयन् न्यायसिद्धान्तमनुसरति । व्यञ्जनावृत्तिं तिरस्कुर्वता प्रतिज्ञानुरोधेन ध्वनेरन्तर्भावमुपपादयता महिमभट्टेन

"अनुमानेऽन्तर्भावं सर्वस्यैव ध्वनेः प्रकाशयितुम् ।[8]
व्यक्तिविवेकं कुरुते प्रणम्य महिमा परां वाचम् ॥"

इति काव्यानुमानस्य चमत्कृत्याधानादनुमानान्तरवैलक्षण्यमुपस्थाप्यते ।

किं चालङ्कारिकैरङ्गीक्रियमाणोऽनुमानालंकारः प्रमाणालंकारवर्गश्च न्यायशास्त्रसिद्धान्तेन प्रभावितो वर्तते । तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वमिति लक्षितं सादृश्यमुपमालंकार औपम्यगर्भालंकारेषु च जीवातुतयाऽभ्युपगम्यते ।

वाक्यं स्याद् योग्यताकाङ्क्षासत्तियुक्तः पदोच्चयः ।[8]

इति विश्वनाथेन वाक्यलक्षणे न्यायशास्त्रप्रसिद्धा योग्यतादिसिद्धान्ता अन्तर्भाव्यन्ते ।

एवं भरतमुनेर्

"विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः[10]"

इति रसनिष्पत्तिसूत्रं व्याकुर्वन्, शङ्कुकः सूत्रगतस्य "संयोगा"-दित्यस्य पदस्य गम्यगमकभावरूपादिति "निष्पत्ति"-रित्यस्य पदस्यानुमितिरिति चार्थमुपवर्णयति; विभावानुभावव्यभिचारिभिर्गम्यगमकभावरूपात् सम्बन्धात् नष्टे पक्षे, रसस्य साध्यस्य निष्पत्तिरनुमितिर्भवतीति सूत्रार्थमुपन्यस्यति । रूपकाद्यलंकारेषु शाब्दबोध आलंकारिका नैयायिका

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

इव प्रथमान्तमुख्य—विशेष्यकशाब्दबोधमङ्गीकुर्वन्ति । इत्थमलंकारशास्त्रं न्यायशास्त्रेणोपबृंहितमास्ते ।

अलंकारपूर्वमीमांसाशास्त्रयोः संबन्धः

वेदवाक्यानामर्थनिर्णये प्रवृत्तस्य मीमांसाशास्त्रस्यालंकारशास्त्रस्य च सम्बन्धो महान् । मीमांसायां विचाराः शास्त्रान्तरोपकारकाः । मीमांसकानां मतमनुसृत्यालंकारशास्त्रे रसस्योत्पत्तिवादः प्रचलति । तात्पर्याख्यां वृत्तिं मीमांसकैकदेशिभिः [भट्टमीमांसकैः] स्वीकृतामालंकारिकाः प्रायोऽङ्गीकुर्वन्ति । तथा च केचिदालंकारिकास्

"तात्पर्याख्योऽपि केषुचित्[11]"

इति कथयन्ति ।

"गङ्गायां घोषः" इत्यादौ शैत्यपावनत्वादिप्रयोजनविशिष्टतीरे लक्षणामाशङ्क्य निरस्यन्त आलंकारिकाः प्रत्यक्षादेर्नीलादिर्विषयः, फलं तु प्रकटयतीत्यध्वरमीमांसकसिद्धान्तमनुसरन्ति ।

आलंकारिकैरङ्गीकृतोऽर्थपत्त्यलंकारः, परिसंख्यालंकारश्च मीमांसकाभिमतमर्थपत्तिप्रमाणं परिसंख्याविधिं च स्मारयतः ।

अलंकारवेदान्तशास्त्रयोः संबन्धः

अलंकारशास्त्रं वेदान्तेनातीव प्रभावितं दृश्यते । तथा हि—

रसगङ्गाधरकारोऽभिनवगुप्तपादमते रसं ब्रह्माभिन्नं वदन्

रसो वै सः । रसं ह्येवायं लब्ध्वानन्दी भवति[12]

[तैत्तिरीयोपनिषत्]

इति उपनिषद्वाक्यं प्रमाणीकरोति । अपि च तत्रैव स रसचर्वणां शाब्दीमपरोक्षात्मिकां चोपपादयति । एवमालंकारिकाः रसस्वरूपेऽभिनवगुप्ताचार्यमतमेव विशिष्याद्रियन्ते वेदान्तशास्त्रप्रभावश्चालंकारशास्त्रे सम्यग् वर्तत इति वक्तुं पार्यते ।

9. कन्यादानं कन्यामलंकृत्य ब्राह्मो विवाहः । —अर्थशास्त्र 3.58.2
10. आच्छाद्य चार्चयित्वा च श्रुतिशीलवते स्वयम् ।
आहूय दानं कन्याया ब्राह्मो धर्मः प्रकीर्तितः ॥ —मनु० 3.27
11. जात्यादिगुणयुक्ताय पुंस्त्वे सति वराय च ।
कन्याऽलंकृत्य दीयेत विवाहो वेधसः स तु ॥
रेतो मज्जति यस्याप्सु सूत्रं च ट्वादिकेऽनिलम् ।
पुमान् स्याल्लक्षणैरेतैर्विपरीतैश्च षण्ढकः ॥ —बृहत्पराशरसंहिता 4.3/4
12. संक्रीडन्ते मणिभिरमरप्रार्थिता यत्र कन्याः । —पूर्वमेध, श्लोक ६
13. अप्रार्थितः प्रयत्नेन ब्राह्मस्तु परिकीर्तितः ॥ —शंखस्मृति 4.4
14. ब्राह्मो विद्याचारित्रबन्धुशीलसम्पन्नाय दद्यादाच्छाद्यालंकृताम् ।—गौतम०अ० 4
15. सहोभौ चरतां धर्ममिति वाचानुभाष्य च ।
कन्याप्रदानमभ्यर्च्य प्राजापत्यो विधिः स्मृतः ॥ —मनु० 3.30
16. प्रार्थितापप्रदानेन प्राजापत्यः प्रकीर्तितः । —शंखस्मृति अ० 4
17. एकं गोमिथुनं द्वे वा वरादादाय धर्मतः ।
कन्याप्रदानं विधिवदार्षो धर्मःस उच्यते । —मनु० 3.29
18. अन्तर्वेद्यामृत्विजे दानाद् दैवः । — अर्थ० 3.58.2
19. ये यज्ञे वर्त्तमाने तु ऋत्विजः कर्म कुर्वते ।
कन्याऽलंकृत्य दीयेत बिवाहः स तु देवकः ॥ —बृहत्पराशर० अ० 4
20. अन्तर्वेद्यृत्विजे दानं दैवः । —गौतमसंहिता अ० 4
21. मिथस्समवायाद् गान्धर्वः ।
22. इच्छयाऽन्योन्यसंयोगः कन्यायाश्च वरस्य च ।
गान्धर्वः स तु विज्ञेयो मैथुन्यः कामसम्भवः ॥
23. नान्यस्तापः कुसुमशरजादिष्टसंयोगसाध्यात् । उत्तरमेघः ।
24. गान्धर्वः समयान्मिथः ।
25. यन्मिथः समयादिमां मदीयां दुहितरं भवानुपायंस्त तन्मया प्रीतिमता युवयोरनु-
ज्ञातम् । —शाकु० अंक 5
26. आसुरो द्रविणादानात् ।
27. ज्ञातिभ्यो द्रविणं दत्वा कन्यायै चैव शक्तितः ।
कन्याप्रदानं स्वाच्छन्द्यादासुरो धर्म उच्यते ॥ —मनु० 3.31
28. क्रयक्रीता तु या नारी न सा पत्न्यभिधीयते ।
न सा दैवे न सा पैत्रे दासीं तां काश्यपोऽब्रवीत् ॥ —कात्या० 3.49

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

29. न कन्यायाः पिता विद्वान् गृह्णीयाच्छुल्कमण्वपि ।
गृह्णञ्शुल्कं हि लोभेन स्यान्नरोऽपत्यविक्रयी ॥ —मनु० 3.51
30. प्रसह्यादानाद् राक्षसः । —अर्थ० 3.58.2
31. सुप्तादानात् पैशाचः । —अर्थ० 3.58.2
32. पैशाचः कन्यकाच्छलात् ।
33. असंविज्ञानोपसंगमनात् पैशाचः ।
34. सर्वेषां प्रीत्यारोपजमप्रतिषिद्धम् । —अर्थ० 3.58.2
35. इतरेषु तु शिष्टेषु नृशंसानृतवादिनः ।
जायन्ते दुर्विवाहेषु ब्रह्मधर्मद्विषः सुताः ॥ —मनु० 3.41
36. तिस्रस्तु भार्या विप्रस्य द्वे भार्ये क्षत्रियस्य तु ।
एकैव भार्या वैश्यस्य तथा शूद्रस्य कीर्तिता ॥ —शंखस्मृति
37. पितृप्रमाणाश्चत्वारः पूर्वे धर्म्याः । मातापितृप्रमाणाः शेषाः ।
तौ हि शुल्कहरौ दुहितुः । —अर्थ० 3.58.2
38. सविस्तार द्रष्टव्य, —अर्थ० 3.58.2
39. यस्मै दद्यात् पिता त्वेनां भ्राता वानुमतः पितुः ।
तं शुश्रूषेत जीवन्तं संस्थितं च न सन्त्यजेत् ॥
विशीलः कामवृत्तो वा गुणैर्वा परिवर्जितः ।
उपन्वर्यः स्त्रिया साध्व्या सततं देववत्पतिः ॥ —मनु०
40. न निष्क्रयविसर्गाभ्यां भर्तुर्भार्या विमुच्यते । —मनु० 9.46
41. अमोक्ष्या भर्तुरकामस्य द्विषती भार्या भार्यायाश्च भर्ता । परस्परं द्वेषान्मोक्षः ।
—अर्थ० 3.59.3
42. सविस्तर द्रष्टव्य, —अर्थ० 3.59.3
43. श्वशुरकुलप्रविष्टायां विभक्तायां वा नाभियोज्यः पतिः । —अर्थ० 3.59.3
44. न विवाहविधावुक्तं विधवावेदनं पुनः । —मनु० 9.65
45. यस्या म्रियेत कन्याया वाचा सत्ये कृते पतिः ।
तामनेन विधानेन निजो विन्देत देवरः ॥ —मनु० 9.69
46. नष्टे मृते प्रव्रजिते क्लीबे च पतिते पतौ ।
पञ्चस्वापत्सु नारीणां पतिरन्यो विधीयते ॥ —पारा० 4.30
47. नीचत्वं परदेशं वा प्रस्थितो राजकिल्विषी ।
प्राणाभिहन्ता पतितस्त्याज्यः क्लीबोऽथवा पतिः ॥ अर्थ० 3.58.2
48. प्रोषितो धर्मकार्यार्थं प्रतीक्ष्योऽष्टौ नरः समाः ।
विद्यार्थं षड् यशोऽर्थं वा कामार्थं त्रींस्तु वत्सरान् ॥ —मनु० 9.76

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

49. सविस्तर द्रष्टव्य, —अर्थशास्त्र, 3.60.4

50. ततः परं धर्मस्थैर्विसृष्टा यथेष्टं विन्देत । तीर्थोपरोधो हि धर्मवध इति कौटिल्यः ।
—अर्थ० 3.60.4

51. एतानुत्क्रम्य दायादान् वेदने जातकर्मणि ।
जारस्त्रीदातृवेत्तारः सम्प्राप्ताः संग्रहात्ययम् ॥ —अर्थ० 3.60.4

52. ब्राह्मणमधीयानं दर्शेत्वर्षाण्यप्रजाता द्वादश प्रजाता । राजपुरुषं आ-आयुःक्षयादाकाङ्क्षेत । सवर्णतश्च प्रजाता नापवादं लभेत । —अर्थ० 3.60.4

53. न चाकामः पुरुषः कुष्ठिनीमुन्मत्तां वा गच्छेत् । स्त्री तु पुत्रार्थमेवम्भूतं चोपगच्छेत्
—अर्थ० 3.58.2

54. शुल्कं स्त्रीधनम् । अशुल्कस्त्रीधनायास्तत्प्रमाणम् । आधिवेदनिकमनुरूपां च वृत्ति दत्त्वा बह्वीरपि विन्देत । पुत्रार्था हि स्त्रियः । — अर्थ० 3.58.2

55. सविस्तर द्रष्टव्य, —अर्थशास्त्र 3.59.3

56. ब्राह्मणक्षत्रिययोरनन्तराः पुत्राः सवर्णाः । एकान्तरा असवर्णाः ।—अर्थ०3 63.7

57. सविस्तर द्रष्टव्य, विष्णुस्मृति, अ० 15

58. सविस्तर द्रष्टव्य; वसिष्ठस्मृति, अ० 17

59. सविस्तर द्रष्टव्य, मनुस्मृति, अ० 9.159/160

60. सविस्तार द्रष्टव्य, याज्ञवल्क्य, दायविभाग 128 से 132 तक

61. द्रष्टव्य, पराशरसंहिता, अ० 4.23।24

62. सविस्तर द्रष्टव्य, अर्थ० 3.63.7

63. सवर्णेभ्यः सवर्णासु जायन्ते हि सजातयः ।
तेषां संकरयोगाच्च प्रतिलोमानुलोमजाः ॥

64. यस्तस्याः पुत्रः स मे पुत्रो भवेदिति या पित्रा दत्ता सा पुत्रिका । पुत्रिकाविधिना प्रतिपादिता पितृभ्रातृविहीना पुत्रिकैव । —विष्णु० अ० 15.

65. यस्यास्तु न भवेद् भ्राता न विज्ञायेत वा पिता ।
नोपयच्छेत तां प्राज्ञः पुत्रिकाकर्मशङ्कया ॥ —लिखितस्मृति

66. सविस्तर द्रष्टव्य, —मनु० अ० 9.48 से 56 तक ।
ओघवाताहृतं बीजं यस्य क्षेत्रे प्ररोहति ।
क्षेत्रिकस्यैव तद् बीजं न वप्ता लभते फलम् ॥ —मनु० 9.54

67. स च पाणिग्राहस्य गृहे च गूढोत्पन्नः षष्ठः । —विष्णु० अ० 15
गूढे वा गूढोत्पन्नः षष्ठः । —वसिष्ठ० अ० 17

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

उत्पद्यते गृहे यस्य न च ज्ञायेत कस्य सः ।
स गृहे गूढ उत्पन्नस्तस्य स्याद्यस्य तल्पजः ।। —मनु० 9.270

68. द्रष्टव्य याज्ञवल्क्य, दायविभाग, 129

69. या गर्भिणी संस्क्रियते ज्ञाताज्ञातापि वा सती ।
वोढुः स गर्भो भवति सहोढ इति चोच्यते ।। —मनु० 9.173

70. सगर्भोढायाः सहोढः । —अर्थ० 3.63.7

71. अथादायादास्तत्र सहोढ एव प्रथमो या गर्भिणी संस्क्रियते तस्यां जातः सहोढः पुत्रो भवति । —वसिष्ठ० अ० 17

72. स्वयंजातः पितृबन्धूनां च दायादः । परजातः संस्कर्तुरेव न बन्धूनाम् ।

73. दत्तको द्वितीयो यं मातापितरौ दद्याताम् । —वसिष्ठ अ० 17

74. माता पिता वा दद्यातां यमद्भिः पुत्रमापदि ।
सदृशं प्रीतिसंयुक्तं स ज्ञेयो दत्त्रिमः सुतः ।। —मनु० 9.168

75. मातापितृविहीनो यस्त्यक्तो वा स्यादकारणात् ।
आत्मानं स्पर्शयेद्यस्मै स्वयंदत्तस्तु स स्मृतः ।। —मनु० 9.177

76. यत्योपान्ते कृतकतनयः कान्तया वर्धितो मे
हस्तप्राप्यस्तवकनमितो बालमन्दारवृक्षः ।। —उत्तरमेघ

77. श्यामाकमुष्टिपरिवर्धितको जहाति ।
सोऽयं न पुत्रकृतकः पदवीं मृगस्ते ।। —शाकुन्तल चतर्थ अंक ।

78. अमुं पुरः पश्यसि देवदारुं पुत्रीकृतोऽसौ वृषभध्वजेन । —रघुवंश द्वितीयसर्ग ।

79. क्रीणीयाद्यस्त्वपत्यार्थं मातापित्रोर्यमन्तिकात् ।
स क्रीतकः सुतस्तस्य सदृशोऽसदृशोऽपि वा ।। —मनु० 9. 174

80. या पत्या वा परित्यक्ता विधवा वा स्वयेच्छया ।
उत्पादयेत्पुनर्भूत्वा सा पौनर्भव उच्यते ।। —मनु० 9.172

81. पुनर्भूः कौमारं भर्तारमुत्सृज्यान्यैः सह चरित्वा तस्यैव कुटम्बमाश्रयति सा पुनर्भूः भवति । या च क्लीवं पतितमुन्मत्तं वा भर्तारमत्सृज्यान्यं पति विन्दते मृते वा सा पुनर्भूर्भवति । —वसिष्ठ० अ० 17

82. अक्षता च क्षता चैव पुनर्भूः संस्कृता पुनः । —याज्ञ० विवाह प्रक० 67

83. अद्भिर्वाचा च दत्तायां म्रियेताथो वरो यदि ।
न च मन्त्रोपनीता स्यात् कुमारी पितुरेव सा ।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

यावच्चेदाहृता कन्या मन्त्रैर्यदि न संस्कृता ।
अन्यस्मै विधिवद् देया यथा कन्या तथैव सा ॥ — वसिष्ठ अ० 18

84. पाणिग्रहे मृते बाला केवलं मंत्रसंस्कृता ।
सा च त्वक्षतयोनिः स्यात् पुनः संस्कारमर्हति ॥ —वसिष्ठ अ० 18

85. पौराणिकस्त्वन्यः सूतो मागधश्च । ब्रह्मक्षत्राद् विशेषतः । —अर्थ० 3.63.7

86. सविस्तर द्रष्टव्य, —वृद्धहारीतसंहिता, अ० 4

87. औरसे तूत्पन्ने सवर्णास्तृतीयांशहराः । असवर्णा ग्रासाच्छादनभागिनः ।
—अर्थ० 3.63.7

88. देशस्य जात्याः सङ्घस्य धर्मो ग्रामस्य वापि यः ।
उचितस्तस्य तेनैव दायधर्मं प्रकल्पयेत् ॥ —अर्थ० 3.63.7

89. सविस्तर द्रष्टव्य, अर्थशास्त्र. अधिकरण 3 अध्याय 5, 6 एवं 7

90. ऊर्ध्वं पितुः पुत्रा ऋक्थं भजेरन् । निवृत्ते रजसि मातुर्जीवति चेच्छति सर्वं वा पूर्वजस्येतरान् बिभृयात् । —गौतमस्मृति

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वैदिकवृषभ इन्द्रः

डा. शैलजा पाण्डेय

वैदिकदेवेष्वग्रगण्य इन्द्रो वक्ष्यमाणंविशेषणैर्भूषितः । सहसावन् (ऋ० ७।१९।७)। शवसः सूनुः (ऋ० ४।२४।१)। समद्वा (ऋ० ७।२०।३)। उग्रः (ऋ० ७।२०।१)। असुरवनकृशानुर्विशालदेही वृषा (ऋ० ४।२२।२) वृषणः (ऋ० ७।२०।५)।

सामान्यतया वृषभशब्दस्यार्थो भवति गोजातेर् जननसमर्थः पुरुषपशुः । विद्वद्भिरस्य शाब्दबोधः सुस्पष्टं कृतः। वैदिकभाष्यकार-शिरोमणिना सायणाचार्येण वृषभशब्दस्यार्थो बलवान् (ऋ० ६।४६।४), कामानां वर्षिता (ऋ० १०।२८।२) अपां वर्षिता (ऋ० ५।५८।६) च कृतः। दाण्डेकरमहोदयो वृषभेन्द्रं पुरुषप्रधानमानवनेतेति कथयति ('वृत्र-हेन्द्र':, एनाल्स आव् द भाण्डारकर ओरियन्टल रिसर्च इन्स्टीट्यूट, पूना ३१, १९५०) । मोनियरविलियम्समहाभागेन वृषभः पुरुषत्व-ज्ञापको मतः (ए संस्कृत इंगलिश डिक्शनरी, वृषभ)। कोथमैक्डानलमहोदययोर-नुसारेण वृषभशब्दस्यार्थः पुङ्गवो वर्त्तते (वैदिक इन्डेक्स आव् नेम्स एण्ड सब्जेक्ट्स-२, पृ० ३२३) आप्टेमहोदयो वृषभपदार्थं श्रेष्ठमपि करोति। अतः वृषभस्यार्था बलवान्, कामनावर्षको, वृष्टिदायको, जननसमर्थः पुरुषः श्रेष्ठश्च ।

बलवान्

शूर (ऋ० ६।४७।११), उग्रश् (ऋ० ६।४७।१६), चर्षणीसह (६।४६।६) इन्द्रोऽतिबलसम्पन्नः । वृत्रादि-शत्रूणां वधस्तस्य वीर्यमु‌द्-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

घोषयति । बलस्याधिक्येनेन्द्रः प्रकृत्योग्रः । अस्य क्रोधात् सर्वे भीता भवन्ति। अस्य मन्युना शत्रुसेना सङ्ग्रामेऽपहततेजस्का भवति 'बाधसे जनान्वृषभेव मन्युना घृषौमीकह ऋचीषम् ।' (ऋ० ६।४६।४)

प्रकृतेरुग्रता पशुवृषभेऽपि दृश्यते । बलमदेन स युयुत्सुः । अतः स्वभावेनेन्द्रो वृषभः ।

श्रेष्ठः

इन्द्रो देवेषु श्रेष्ठो ज्येष्ठश्च । ऋग्वेदे सर्वाधिकाः स्तुतय ऽइन्द्रस्य लभ्यन्ते । उक्तं च—

'इन्द्र ज्येष्ठं न आ भरँ ओजिष्ठं पपुरि श्रवः ।'

(ऋ० ६।४६।५)

ऐतरेयब्राह्मणानुसारेणेन्द्रो द्वादशाहयागेन ज्येष्ठत्वं प्राप्नोत् (४।४।३)। कौषितकि ब्राह्मणकारेण स्पष्टतयोक्तं 'न वा इन्द्रादन्यदुत्तरमस्ति' (१७।४)। अत इन्द्रः श्रेष्ठत्वेन ज्येष्ठत्वेन च वृषभः। इन्द्रस्य प्रामुख्यं पुराणेष्वपि परिलक्ष्यते । तत्र स देवराड् वर्त्तते ।

कामनावर्षकः

भक्तजनानां कामनायाः पूरयितेन्द्रो वेदेषु बहुधा गीतः । स्तोतृजनानां सन्तुष्टयर्थं तेषां रक्षार्थं चेन्द्रः सदैव तत्परो वर्त्तते। वृत्रवधो लोकहितायेन्द्रकृतं सर्वाधिकमहत्त्वपूर्णं कृत्यम् ।

इन्द्रो दानेन स्तोतृजनानां कामपूर्ति करोति। संहितास्वस्य दानकर्मणो महती प्रशंसा वर्तते । तस्य दानानि विविधप्रकारकाणि ।

स धनप्रदाता । तस्य धनं दिव्यं पार्थिवं चोभयविधं भवति (वाजसनेयी संहिता, ३।१०) उपासका इन्द्रादुपभोग्यं पुत्रादिसमन्वितं धनं याचन्ते (ऋ० २।११।२०) । उदिते च सूर्ये इन्द्रो धनदानं करोति (ऋ० ५।३३।६) । स यजमानाय शत्रुधनस्यापहरणङ्करोति (ऋ०

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

५।३४।७)। इन्द्रप्रदत्तं धनं श्वेतवर्णं भवति (ऋ०५।३३।६) धनप्रदानेन इन्द्रो धनदा (ऋ० १।३३।२) वसुदा (ऋ० ८।९९।४) मघवा (ऋ० १।३२।३) चोक्तः।

इन्द्र उपासकेभ्योऽभिलषितरूपं ददाति। रूपप्रदानेन स 'सुरूपकृत्नुः' कथितः (ऋ० १।४।१)।

इन्द्रो गोप्रदाता। अयं गवामधिपतिरुक्तः। इन्द्रः स्तोतृभ्यो गा ददाति (ऋ० १।४।२)। गोप्रदानेन स गोदा (ऋ० ३।१०।२१), गोपतिश्च (ऋ० १।१०१।४) कीर्तितः।

ज्ञानाभिलाषिजनानां कृत इन्द्रो ज्ञानप्रदाता। स ज्ञानपिपासुजनाय ज्ञानं ददाति (वाजसनेयी संहिता ३४।१८)।

इन्द्रः स्तोतृभ्यः पत्नीर् ददाति। ऋग्वेद इन्द्रस्य पत्नीदानं गीतम्—

'अददा अर्भां महते वचस्यवे कक्षीवते वृचयामिन्द्र सुन्वते।
मेनाभवो वृषणश्वस्य सुक्रतो विश्वेत्ता ते सवनेषु प्रवाच्या॥'

(ऋ० १।५१।१३)

इन्द्रः कक्षीवते राज्ञे वृचयाख्यां तरुणीं योषितं प्रादात्।

इन्द्रः पुरुषत्वस्यापि प्रदाता। स पुरुषत्वस्य वृषण्यसंज्ञकेनौषधेन सम्बद्धः (अथर्ववेद—४।४।४)

उपासक इन्द्रं 'त्रिधातु शरणं त्रिवरूथं स्वतिमद्' गृहं याचते (ऋ० ६।४६।९)। इन्द्र उपासकेभ्यः सुवर्णं, सूर्यमश्व-(ऋ० ३।१४।९) मौषधं, दिनं, वनस्पतिमन्तरिक्षञ्च' (ऋ० ३।३४।१०) ददाति।

पुरुषः

इन्द्रः सेचनसमर्थः पुरुषत्वप्रतीको देवः। ऋग्वेदस्य वृषकपिसंवादे (१०।८६) तस्य पुरुषत्वं वर्णितम्। इन्द्राणीन्द्रस्य पत्नी भूत्वा गौरवान्विता भवति। इन्द्रस्य पौरुषेण शचीतराः स्त्रियह आकृष्टास्तस्योपासिका अत इन्द्राणी सपत्नीजन ईर्ष्यामनुभवति (ऋ० १०।१४५)।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

इन्द्रस्य पुरुषत्वं तत्र कामलोलुपतामुत्पादयति । ऋग्वेद इन्द्रः 'सहस्रमुष्कः' (६।४६।३) कथितः । शब्दप्रसङ्गेऽस्मिन्नाचार्यसायणः कथमति—'सहस्रमुष्कः सहस्रशेफः । यां कां च स्त्रियं संभवन्निन्द्रो भोगलोलुपतया स्वशरीरे पर्वणि पर्वणि शेफान् ससर्जेति कौषितकिभिराम्नातम् । तदभिप्रायेणेदं सम्बोधनम् ।' काठकसंहितायामपि इन्द्रस्य कामप्रसङ्गो वर्णितः—

'इन्द्रो वै विलिस्तेङ्गां दानवीमकामयत् ।
सोऽसुरेष्वचरत् स्त्र्येव स्त्रीष्वभवत् पुमान् ।।'

(१३।५)

अयं भावोऽपालाकथाप्रसङ्गेऽपि निर्दिष्टो भाष्यकारेणाचार्यसायणेन । पुराणेषु अहल्याकथा (वाल्मीकिरामायण) जनमेजयाख्याने महिष्या वपुष्टमया सहेन्द्रप्रसङ्गः (हरिवंशपुराण) प्रसिद्धः ।

इत्थं जननसमर्थ इन्द्रः सहजः स्वेच्छाचारी कामुको वृषभः ।

वृष्टिदेवता

वृष्टिदेवतारूपेणापीन्द्रो वृषभः । पुरुषवृषभो रेतस्सेचनसमर्थो भवति । वृष्टिदेवरूपेणेन्द्रो वृष्टिजलेन पृथिव्याः सेचनङ्करोति । तस्य सेचनेनौषधीनां जन्म भवति ।

इन्द्रवृत्रसंघर्षे वृत्रेनाच्छादितं मेघस्थं जलं पृथिव्यामायाति (ऋ० २।१५।३) इन्द्रः क्रुद्धो वृषभ इव मेघांश्छिन्नत्ति (अथर्ववेद, २०।१७।८) ।

पौराणिकसाहित्य इन्द्रो वृष्टिदेवरूपेण सुतरां प्रतिष्ठितः । महाभारतस्यादिपर्वणि खाण्डववनदाहप्रसङ्गे ऋषिगणैः स्तुत इन्द्रो दयार्द्रो भूत्वा वृष्टिमकरोत् । क्रुद्धः सन्निन्द्रोऽनावृष्टिरूपेणातिवृष्टिरूपेण वा जनान् दण्डयति । भागवतपुराण (१०।२५।१५) इन्द्रो व्रजगोपैरपूजितो भूत्वाऽतिवृष्टिमकरोत् । तत्रैव हरिवंशपुराणे राज्ञः सत्यव्रतस्याचरणात् क्षुब्धस्तस्य राज्ये द्वादशवर्षपर्यन्तमनावृष्टिमकरोत् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

संक्षेपेण वृषभपदेनेन्द्रस्य चरित्रं स्फुटं भवति। इन्द्रस्येदं विशेषणं सार्थकम्—

'यस्तिग्मशृङ्गो वृषभो न भीम
एकः कृष्टीश्च्यावयति प्र विश्वाः।
यः शश्वतो अदाशुषो गयस्य
प्रयन्तासि सुष्वितराय वेदः,॥

(ऋ० ७।१९।१)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सूर्य की क्षति-पूर्ति

—डा. नागेन्द्र नागर

ॐ त्वमिमा ओषधीः सोम विश्वास्त्वमपो अजनयस्त्वं गाः ।

त्वमाततन्थोर्वन्तरिक्षं त्वं ज्योतिषा वितमो ववर्थ

—ऋग्वेद १।९१।२२

यव (जौ) चावल इत्यादिक ओषधि चन्द्रमा ही उत्पन्न करता है। जल एवं गाय भी सोम से ही संभूत हैं। ओषधि, जल एवं गो रस (दूध) इत्यादिक में सोम ही प्रचुरता से अभिव्याप्त है।

आकाश को भी सोम ही विस्तीर्ण करता है। समस्त आकाश में सोम ही व्याप्त है।

सूर्य-किरणों के संसर्ग से सोम ही प्रज्वलित होता हुआ ज्योतिरूप से अंधकार दूर करता है।

लोक में भी घी, तैलादिक में स्थित चन्द्र ही अग्नि के सम्पर्क से दीपकादिकों में प्रकाश-रूप से अन्धकार को दूर करता है। सूर्य सोम आकाश में ऋत-रूप से स्थित है।

शतपथ ब्राह्मण में भी उल्लिखित है:

'अन्नादेवाग्निरभवदन्नं सोमोऽन्नादश्च वा इदं सर्वमन्नं च'

—शतपथ ब्राह्मण ११।१।६।१९

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सोम अन्तरिक्ष में ऋत रूप से स्थित है। तथा अग्नि केन्द्राधार में स्थित है। उस (अग्नि)-को सत्त्व कहते हैं। यह अग्नि विकास-शील होकर केन्द्र से बाहर चारो ओर विकास करती हुई अभिव्याप्त होती है।

सोम संकोचशील है तथा चारो ओर संकुचित होता हुआ अग्नि में गिरता है। यही सोम अग्नि की आहुति वैदिक विज्ञान मानता है।

अग्नि में हवन किया सोम अग्नि रूप होता है।

इसी को रूपान्तर प्राप्त संगतिकरण यज् धातु का अर्थ वेद उद्बोधित करता है। चूंकि सोम विकासशील है, अतः अग्नि-रूपता को प्राप्त करके बाहर आता है। यही सोम दूर फैलता हुआ केन्द्र सम्बन्ध त्याग कर पुनः सोम-रूपता को प्राप्त होता है।

यह अग्नि सोम-अन्योन्य-रूपतापत्ति-स्वरूप-चक्र निरन्तर संसार में प्रवृत्त रहता है। इसी को प्राकृतिक यज्ञ कहते हैं।

निरन्तर उष्ण प्रकाश उद्भासित करता हुआ सूर्य समस्त स्थान पर संक्रमित होता है। इसको आधुनिक विज्ञान प्रतिपादित करते हैं। इस के परिमाण अनन्त कोटि परिमित की व्याखया करते हैं। किन्तु वैज्ञानिक आज तक इस सिद्धान्त को निश्चित नहीं कर सके हैं कि प्रतिक्षण उत्पन्न हो रहा सूर्य-मण्डल क्षति कैसे पूर्ण करता है ?

वैदिक विज्ञान अनादि काल से ही "सूर्य-मण्डल-क्षति" सिद्धान्त को निश्चित कर चुका है।

"भूर्भुवः स्वः" में आया "स्वः" स्वर्-लोक है। वही सूर्य-मण्डल है। इसके ऊपर मर्त्य लोक (अन्तरिक्ष) है। एवं उसके ऊपर जन लोक है। यहीं सोम लोक है। उससे निरन्तर अनन्त कोटि गुना सोम प्रतिक्षण सूर्य-मण्डल में आहुति रूप से आप्लावित होता है। उसी सोम को अग्नि-रूप से प्राप्त करके सूर्य संसार को प्रकाशित करता है। यही निरन्तर सोमाहुति है।

"आहुत्याप्यायते सूर्यः" इत्यादिक मन्वादिक स्मृतियों में संकेत प्राप्त होता है।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

भारत में जो यज्ञ होता है उस में घृतादिक के द्वारा हवन होता है। उसके अन्तर्गत जो सोम है, वही सोम सूर्य किरणों के द्वारा सूर्य-मंडल को जाता है।

जिस प्रकार नेत्र कज्जल सुखमय, रोग-निवर्त्तक और दृष्टिवर्धक होता है, उसी प्रकार सोमाभिषिक्त आहुतियां भी प्राकृतिक यज्ञ द्वारा सूर्य की क्षति पूर्ति करती हैं।

जिस प्रकार दीपक के अन्दर तेल कम होने पर पुनः तेल डालने पर दीपक विशिष्ट प्रकाश से प्रकाशित होने लगता है, उसी प्रकार सूर्य सोम प्राप्त कर पुनः पूर्व रूप प्राप्त कर प्रकाशित होता है।

आजकल जब विद्युत् के दीप (बल्ब) तेज (वोल्टेज) के अभाव के कारण मन्दे होकर टिमटिमाने लगते हैं तब तेज बढ़ाने पर विशिष्ट ज्योतिर्मय प्रकाश से प्रकाशित होने लगते हैं, उसी प्रकार सूर्य में भी प्रतिक्षण प्रकाश की जो निरन्तर क्षति हो रही है, वह सोम पूर्ण करता है।

सूर्य की चारो दिशाओं में व्याप्त जो मूलभूत अग्नि है, वही सूर्य-मण्डल-शक्ति से चारो ओर सूर्य के प्रकाश को प्रकाशित करती है।

फिर वह प्रकाश सोम के संसर्ग से सूर्य में अभिव्याप्त होता है। इस प्रकार निरन्तर सूर्य की क्षति की पूर्ति होती रहती है।

यही वैदिक विज्ञान का सिद्धान्त है।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

काश्मीरे संस्कृतम् पूर्वतोऽनुवृत्तम्

—दीनानाथयक्षः

इतः पूर्वं काश्मीरे संस्कृतमित्यस्य निबन्धे मया संस्कृतस्थितिं यावच्छक्यं दर्शयितुं प्रयत्नः कृतः। अथात्र भारतभारतीविद्वद्भिर्लुण्ठ्यमानमपह्रियमाणञ्च संस्कृतिमूलकं भारतभारतीयत्वप्रशंसि संस्कृतं वीक्ष्यास्योद्धाराय संस्कृतप्रणयिनो विविधं प्रयेतिरे। त्रयस्त्रिंशदूर्ध्वं-त्रयोदशशततमात् खिस्ताब्दादारभ्य त्रिंशदुत्तराष्टादशशततमखिस्ताब्दं यावत् संस्कृतस्य तथात्र प्रादुर्भूतस्य शैवदर्शनस्य सर्वथा ह्रासरूपो विलोपोऽजनि। अस्मिन्नेवानेहसि महामहिमशालिनां महत्त्वपूर्णानां ग्रन्थरत्नानां नाशोऽभूत्। किंच मठेष्ववस्थितानां विद्यावेश्मनां प्रत्नाः पुस्तकालयाः सार्वात्म्यरूपेण विदाहिता नाशिताश्चाभूवन् येन प्रत्नां काश्मीरिकीं शैक्षणिकीं सरणिं पद्धतिञ्च ज्ञातुमनलम्भूष्णवः स्मः। मध्ययुगे तु कलापकातन्त्रव्याकरणामरकोशादयोऽत्र पाठ्यक्रम उपयुज्यन्ते स्म। एवमेवादिकालीनां पाठ्यप्रक्रियामनुमातुं न शक्यते। अथ काश्मीरे पञ्चशतात्मके कालक्रमे प्राक्तन्याः पठन-पाठन-परिपाट्या नेषदपि संस्कारोऽवशिष्टः। अथ कश्मीरेषु शनैः शनैः पारस्यभाषाभिक्रमकाले माध्यमिके युगे जोनराजश्रीवरभट्टजगद्धरवल्लभदेवाह्लादभट्टभक्तयारश्रीवकादीन्विहाय न कोऽपि लेखको दृग्गोचरीभवति। पूर्वोक्ता इमे लेखकाः स्वस्वशासकानां तटस्थतामेव प्रायेण व्यक्तीकुर्वन्तीति ते तत्तच्छासकस्य तटस्थतामये युगे प्रादुर्बभूवुः। अमीषां कृतयः काश्मीरे तस्माद्बहिश्च सर्वत्र विलसन्ति। अस्मिन्नेव समये शैवदेशिकैः सार्धं शैवशासनलेखकानां प्रायशोऽभावोऽजनिष्ट। परं क्वाचित्कतया शैवसाधका गुप्तमगुप्तं वा दरीदृश्यन्ते स्म

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

येनाद्य तावदप्यंशांशिकयाप्येतत्प्रभाविताः काश्मीरिकाः सन्तो लक्ष्यन्ते। उत्तरोत्तरञ्चात्र पारस्यभाषायास्तदुपजीव्यस्य साहित्यस्य च चतुरस्रमुदयोऽजनि। न केवलं तत्परिपोषका यवना एव पारस्यसाहित्यस्रष्टारः समभूवन्नपि तु काश्मीरिकपण्डिता अपि पारस्यभाषायामप्यत्र श्रीवृद्धिञ्चक्रुः। परमस्मिन्नेव युगेऽत्र संस्कृतसंस्कृतेर्विप्रलोपः पराकोटिमागतः। अथ कालेन सिखशासनकालेऽपि राजभाषारूपेण पारस्यभाषैव प्राधान्यं भेजे। वृत्तिहेतोः सर्वे ब्राह्मणाः पारस्यभाषामेव पेठुरिति ते सर्वथा पारस्यभाषापठन एव परिश्रमञ्चक्रिरे। परिणामतो बहवः काश्मीरिकपण्डिताः काश्मीरे पारस्यसाहित्यसृजो बभूवुः। फलतः पारम्परिक्याः कुलक्रमागताया गीर्वाणगिरो ह्रासोऽजनिष्ट इतश्च प्रशासका यवनाः पारस्य-भाषां राजभाषापदासीनां द्रष्टुं नितान्तमुत्सुका आसन्। चतुर्दशशतकारम्भेऽव्युत्पन्नाया संस्कृति वा च स्थाने पारस्यभाषा राजभाषापदासीनाऽभूत्। सर्वत्र सर्वतश्च पारस्यभाषाया एव डिण्डिमारावः सर्वकारीयकार्यकलापे तस्माद्बहिरप्यश्रूयत। कुलक्रमायातानां पण्डितानां विरोधोऽपि सर्वथाऽकिञ्चित्करो जातः। न पठेद्यावनीं भाषां प्राणैः कण्ठगतैरपीत्येषां प्रमुखो विश्रुत आभाणकोऽपि कालगर्भ एव निलीनोऽभूत्। दुर्यवनानां जघन्यदुर्दम्यनीतेः पुरतः स्थातुं ते न चक्षमिरे। यवनात्याचारस्य विविधाः कुत्सिता वार्ता अद्यापि यत्र तत्र वृद्धजनेभ्यः समाकर्ण्यन्त एव। केचन पितृपैतामहिकीं जन्मभूमिमुज्झित्वाऽपुनरागमनाय पलायाञ्चक्रिरे। कैश्चित्प्रवसद्भिः पलायनपरैश्च मध्येमार्गमेवासवः समुत्सृष्टाः। केचन प्रवासेऽपि नितरां क्लेशभाजो बभूवुः। केचन निजनैसर्गिकपाण्डित्यमण्डिताः सहजप्रतिभाप्रतिभाताः प्रवासेऽपि प्रोच्चां पदवीमधिजग्मुः। केचनाल्पसामर्थ्यहेतोरशक्ततया सुदुर्लभेषु यातायातमार्गेषु सर्वकारद्वारा प्रचालितेन परदेशगमननिषेधादेशेन वार्यमाणा उपत्यकायामेव पुटपाकवद् विविधैरमानवीयैरभद्रैरशिष्टैरत्याचारैः कष्टानि विषेहिरे। परे प्राणाञ्जहुः परःसहस्रा असहिष्णवो जनाः स्वां जातिं दूषयामासुः परधर्मञ्चाशिश्रियिरे। यावनतेजोऽसहिष्णुभिरत्र प्रायेण ब्रह्मक्षत्रविडन्त्यजैः सममेव स्वीयो

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

गरिमगुरुर्धर्मः समुज्झित एव। किम्बहुना । परधर्षणासहनशीलैरत्रत्यैः क्षात्रैरपि पराभिभवहेतोः स्वीयं क्षात्रं तेजः समुत्सृष्टमेव । परिणामतस्तेऽपि स्वजातिधर्मोत्सर्गे वैवश्यमापेदिरे । बहुसंख्यकैः सौगतैस्तथागतधर्ममर्यादा-परिपाटीः समुज्झित्यानायासं यवनधर्मं स्वीकृत्य स्वचैत्यानि यवनधर्मा-गारेषु यथातथं परिवर्तितानि येनाद्यत्वेऽपि तेषां चन्द्रशालास्वट्टालिकासु पगोडारूपेण तथागतधर्मशंसीनि लक्ष्माणि निभाल्यन्ते गवेषणापरैरनु-सन्धातृभिश्च परिशील्यन्ते । ब्राह्मणधर्मास्तिक्योद्भावकानि परमपवित्राणि देवधामानि प्रायेण यवनयाञ्चालयेषु परिवर्तितान्येवाभूवन् येषां सुरमूर्तयः सर्वथा विध्वंसिताः काश्चन वितस्तानदनदीकूपेषु प्राक्षिप्यन्त येन वास्तुस्थापत्यकलायाः सुस्पष्टमादर्शभूतानि चिह्नानि तथा प्रचुर मात्रया नोपलभ्यन्ते यथा तेषामुपलब्धेरासीत् संभावना । न चापि स्थानीय-पुरातत्त्वविभागस्यासन्तोषावहेन गतिविधिना निखातानि भूमिसाद्भूतानि तान्युपलब्धानि भवितुं शक्यानि भवेयुः । अथाचिरेण फतेहकदलाभ्याशे दूकानिसङ्गीनमुहल्लाभ्यन्तर एकस्य यवनदेवालयस्य जीर्णोद्धारक्रियया-ऽधःपातितस्य सुरम्या देवमूर्तयः सुवाच्यः शिलालेखः समधिगता अभूवन् या बुलबुलालङ्कारमठवद् यवनैर्निर्दयं टङ्कैरस्मत्समक्षमेव विध्वंसिताः। ईदृशीषु परिस्थितिषु पुरातत्त्वकार्यालयः संसूचितोऽकिञ्चित्करोऽव-तिष्ठते । अस्मादेव हेतोः प्रायेण काश्मीरेषु समग्राः समुपलभ्यमानां यवन-देवालया मूलतो हिन्दुत्वसंस्कृतिमूलका एव। अस्मिन्नेव युगे सहस्रशः काश्मीरसंस्कृतिसभ्यतानिदर्शकाः प्रत्नग्रन्थरत्नराशिर्नितरां कथाशेषतामेव गतोऽभूत् । अनन्तैर्ग्रन्थरत्नराशिभिः पद्ममहातद्मोपकण्ठभूता अनूपदेशा पूरिता अभूवन् येन साधिनामुसुत्थसेतुप्रदेशा (सत्थू) अद्यापि वृद्धैर्गुरुजनैः स्मार्यन्ते । प्रायशो भूसुरैरपि स्वधर्मपरम्परानुकूलं विद्यामार्गमुत्सृज्य राजप्रजोभयमता यावनी विद्यैवोपाश्रिताऽभूद् यद्वशात्ते राजकीयवृत्त्युपार्जने क्षमा बभूवुः। शारदामहत्त्वमजानानैर्यवनैः प्राचीनपरिपाटीनिबद्धानां विद्यावेश्मनां सर्वथाध्वंसोऽक्रियत तत्स्थाने नवीनयवनपरिपाटीप्रचालि-तानि विद्यावेश्मानि प्रतिष्ठां प्रापुः । विप्राणां ह्यनुरञ्जनाय कदाचिदुदारा-शयभूतेन जैननृपतिना (1420-60) ब्राह्मणत्वसंस्कारधर्मसंरक्षणाय भट्टजा-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तिर्गुरु (पुरोहित)-कारकुनयोर्विभाजिताभूद् ययोरेको हिन्दुसंस्कारपरिपालकः परिपोषकश्च निर्धारितोऽभूदपरो राजकीयशासनभारोद्वहनक्षमः कारकुनाभिध उपक्लृप्तोऽभूद् यावद्यापि दृष्टिपथमवतरतः । तत्रादिमेन वर्गेण द्वितीयेन च कालक्रमेण परम्परायातः स्वकीयः क्रमः शनैः शनैः परित्यक्तुं समारब्धः । तत्रादिमवर्गीयेणानेकानि कृच्छ्राण्यनुभूय सन्तोषवृत्त्या क्षुच्छीतातपादिकमप्यविगणय्य वत्सराणां पञ्चशतीमभिव्याप्य विप्रत्वसंस्कृतिसभ्यताया रक्षणस्य भरो निर्व्यूढः। अथ पौरोहितीं वृत्तिमाचरन्तो गुरुवर्गीया (गोर) विप्रा एव पुरोहितोपयोगिनीं ज्योतिर्विद्यां संस्कृतभाषाञ्च स्ववर्गीयेभ्यः पण्डितेभ्यः सुगुप्तमधीयते स्म । कारकुनवर्गीया विप्रा अपि पारस्यभाषाशिक्षणात्प्रागेभ्यः सकाशात् स्नानविधिसन्ध्योपासनादीनि स्वधर्मक्रियोपयोगीनि पुस्तकानि रहो वाचयन्ति स्म । इतश्च यवनमतप्रसारप्रचारोद्रेकाय यज्ञोपवीतधारणस्य शवदाहस्य च कृते यवनशासकैर्दुःसहस्तीव्रः करो निर्धारितोऽभूद् यस्योत्कटं भारमसहिष्णुभिः करप्रदानाक्षमैरनेकैर्विप्रैः स्वजातिरुज्झिताऽभूत् । यस्तावत् परस्तात् काश्मीरभूपरिवृढेन यवनशासकेन जैन् अल-आब्दीनेन दयया मनाङ् न्यूनतां नीत आसीदिति जैनराजतरङ्गिणीतो ज्ञायते । नरेशोऽयं स्वतन्त्रकाश्मीरयवनशासकेष्वकबरसार्वभौमवदुदाराशयः कूटनीतिज्ञश्चासीत् । अथ प्राचीनसभ्यतासंस्कृतिवाचकानां भूर्जग्रन्थानां विषय एवमनुश्रूयते यत् पद्म[1]सरोऽभ्यर्णवर्त्तिनः प्रदेशास्तथा [2]माक्षिकस्वामि श्री[3]शैतलनाथभैरवीपान्त्यवर्त्तिनो महाश्मशानस्था अनूपप्रायाः प्रदेशा महार्घैर्भूर्जग्रन्थैरेव पूरिता अभूवन् । अन्ये तु नौष्वारोप्य महापद्मसरसि प्रायेण प्रक्षिप्यन्ते स्म । अद्यापि तत्र सुदीर्घतमेन नौकादण्डप्रचालनप्रयोगेणागाधातलगभीरस्थानेषूत्तोल्य भूर्जपत्राणि प्रवाह्यन्त इत्येकैरनुभूतचरो ह्येषविषयोऽस्माभिस्तु श्रुतचरः । पूर्वं सर्वकारीय-कार्यकलापस्तु संस्कृते ततः पारस्यभाषामाध्यमेन सर्वत्र काश्मीरे प्रवर्तते स्म कतिपयैरुदारयवनराजभिः संरक्षिता अपि विहारादिमठस्थाः पुस्तकालया भस्मसान्नीता अभूवन् । काम्बोजदेशस्यायत्तभूते काश्मीरमण्डलेऽस्मिन् पुष्टाङ्गाना-(पठान)मनिर्वचनीयैरत्याचारैः काश्मीरिका नितरां पीडिता अभूवन् । प्रायोऽतीतयवनदुराचारेभ्यः

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कथञ्चिदुज्जीविता विप्रजातिरियमनेकैरायासैः क्लेशिता तदा नितरां खिन्नाऽभूत् । तेषां बलात्कार-धर्मपरिवर्तनसतीत्वविभ्रंशजीवद्दाहसुरागार-विध्वंसरूपा दुःश्रव्या अत्याचारात्मकाः काश्मीरे परम्परया श्रूयमाणा हृदयविदारका उदन्ता अद्यापि श्रूयन्ते । न केवलं तदानीं संस्कृतभाषा विरलप्रचारापि तु सर्वतः सर्वथा लुप्तप्रचारा बभूव । तत्स्थाने च सर्वत्र पारस्यभाषैव प्रयुज्यते स्म । यथा पूर्वं काश्मीरगीर्गीर्वाणगिरा प्राचुर्येण प्रभाविता सम्पृक्ता चाभूत्तथैव तदानीं पारस्यभाषा भूयिष्ठा बभूव । गृहे गृहे तस्या निरर्गलं प्रचारोऽजनि । अस्या एव केचन विद्यालयास्तानीं प्रवृत्ता आसन्नित्यब्रार-उल-अस्रारतो ज्ञायते येषु आरब्यभाषा पारस्य-भाषया सह यथा नियममध्याप्यते स्म । अथ यवनशासकैर्विप्रा राजभाषा-परिशीलनाय यथा वैवश्यमापादितास्तथा तत्पूर्वमभिहितप्रायमेव । ईदृश्या-मेव परिस्थितौ संस्कृतभाषा विकासोन्मुखी न संवृत्ता । अयमेव मुख्यो हेतुर्यदप[4]घानशासनकाले न कोऽपि गीर्वाणगिरि ग्रन्थकार उदभूत् । युगमिद-मन्धतामिस्रावृतमासीत् । किञ्चेयं भाषा शारदाजन्मभुवि काश्मीरधराया-मपरात्वमासाद्य चिरायोपरताऽभूत् । परमद्यापि द्विजजनोचिताः संस्काराः संस्कृतभाषामाध्यमेनैव ब्राह्मणसमाजे प्रचलन्ति । प्रायेण प्रातः सायमीश-वन्दनादिकमपि भूम्नेमामेव सुरवाणीं द्वारीकृत्य प्रवर्तते । दुरदृष्टवशादुद-र्कोऽसमीचीनो गीर्वाणगिरः काश्मीरे दृश्यते । पण्डिततल्लजैर्विप्रैरत्राधुनेयं पुरोहितवर्गस्य पैतृकं रिक्थमिति विभाव्यावहेल्यते । प्रायेणाधुना संस्कृता-ध्ययनशीलाः संस्कृतपरायणा विप्रवर्गस्थाः पुरोहिता अपि लोके जघन्यया दृशा समीक्ष्यन्त इत्यनेनैव हेतुना तैरपि गिरोऽस्या अपमानो विहितः । कारकुनवर्गमनुकुर्वद्भिस्तैः पारम्परिकः स्वीयः शिष्टाचारोऽपि परित्यक्त-प्राय एव । वर्गोऽयमपरपक्षानुकरणे स्वं गौरवं मन्यमानः परिदृश्यते । पूर्वपक्षीयेण वर्गेण स्वामानुवंशिकीं कुलक्रमागतां रीतिं विहाय नव्या स्वेच्छोद्भाविता स्वतन्त्रधर्ममतपद्धतिराश्रिता यामनुसर्तुमुत्तरोत्तरं तेन समुत्कण्ठचते । गौरवञ्च मन्यते । अयमेव वर्गः पुरा प्राणानप्यविगणय्या-नेकानि कष्टानि परिमृष्य स्वधर्मसंस्कृतिं ररक्ष । अधुना तेषां गृहेषु स्वाध्यायाग्निहोत्रेशवन्दनादिकं कर्म नियमेन न प्रचलति यदर्थन्तैर्यवन-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शासनकाले सुमहान्त्यननुभूतपूर्वाण्याभीलानि सोढान्यासन् । अद्यत्वेऽनभिज्ञेन कारकुनवर्गेण क्रियमाणं न्यक्कारं वीक्ष्य प्रायेण स्वां गौरवास्पदभूतां जातिमपह्नुवानाऽपरेण प्रतिवर्गेण सह विवाहादिसम्बन्धेम सम्पर्कं जनयितुं गौरवं मन्यन्ते । अत्राज्ञकारकुनवर्गकर्तृकोऽपमानोऽप्यन्यतमो हेतुरध्यवसीयते । सम्प्रति सर्वतः सर्वथोभयवर्गीयेण स्वीयं कर्तव्यमुज्झितमस्ति । स्वदेशगौरवविषये श्रीबिल्हणकवेर्गर्वोक्तिरियं यत्र स्त्रीणां…जन्मभाषावदेव प्रत्यावासं विलसति वचः संस्कृतं प्राकृतं वेति सार्वात्म्येनैतर्हि विपरीतैव प्रतिभाति । नेह तादृग्विधाऽवस्थाऽधुनोपलभ्यते याऽवास्तवाऽभूतपूर्वाद्भुतमयीव लक्ष्यते । कालगर्भे लीनोऽसौ कालः कालेनाभूत् स पारस्य भाषामयस्तदुद्भावको राजप्रजोभयसम्मतः । अधुनाऽयमेवाङ्गलभाषामयो जातः । एतर्हि प्रतिग्रामं प्रतिगेहं प्रतिनगरं प्रतिशाखानगरमाङ्ग्लभाषाया अप्रतिहतं निरर्गलं साम्राज्यं विलसति । इयमेव सर्वत्र सर्वस्य कर्णशष्कुलीः पूरयन्ती समालोक्यते । पूर्वमार्टमहाविद्यालयेषु वैकल्पिकीयं भाषा परमादरणीयत्वमभजत । अधुनात्र द्वित्रान् महाविद्यालयान्विहाय नान्येषु भाषेयं दृश्यते । अन्यत्र तु विज्ञानस्यैव समादरो विलोक्यते । इतश्चानेकैः पण्डितैरज्ञानवशात्तथाऽचिरेण स्वीकृतयवनधर्मैभिर्नव्यैर्यवनैर्विद्वेषात् सुमहत्त्वपूर्णानि नैकविधविषयामर्शीनि भूर्जग्रन्थरत्नानि विध्वंसितानि । येनाधुनोपलभ्यमानविविधविषयसंवलिते काश्मीरसंस्कृतसाहित्ये परःसहस्राणामुद्धृतग्रन्थरत्नानां नाममात्रं विहाय न कुत्राप्यस्तित्वं लभ्यते । यवनधर्मप्राधान्याद्देवालया विहारा मठाश्च स्वान्तर्वर्तिभिः पुस्तकालयैः सार्धमेव पूर्वरूपं विहाय स्वान्तर्वर्तिनः सभ्यतासंस्कृतिशंसिनः पुस्तकालयान् नाशयित्वा संज्ञान्तराणि दधिरे । केषाञ्चिद्यवनपुङ्गवानां गृहेषु संस्कृतमातृका अद्याप्युपलभ्यन्ते यास्तु बलवद्विद्वेषाग्निदग्धैस्तैर्लोकोपकृतये सर्वकारसान्न क्रियन्ते । यत्र कुत्राप्युपलभ्यमानं शारदाक्षरलिखितं भूर्जग्रन्थजातं तैर्विध्वंस्यते स्मेत्यस्माभिरनेकशः श्रुतचरमस्मत्पूर्वजैश्च दृष्टम् । अथ काश्मीरे प्रत्नसारगर्भतत्त्वजातेन सार्धं सर्वत्र समन्ततश्च फिरङ्गैर्मूल्येन नीयमानं लुण्ठ्यमानञ्च प्रत्नग्रन्थरत्नराशि बिलोक्य काश्मीरनरेशः श्रीरणवीरसिंहोऽभिनवमेकं कार्यालयं

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

स्वराज्ये समुद्घाटयामासेति पूर्वलेखे निर्दिष्टप्रायमेव यत्र मातृकाणां प्रतिलिपिकरणं संस्कृतग्रन्थानां यवनाङ्गलदेशीयविशिष्टचिकित्साग्रन्थानां विश्वस्य प्रमुखसभ्यदेशोद्भवदर्शनशास्त्राणां तदानीं भारते नवागतायाः पाश्चात्यसैनिकशिक्षासरणेर्गीर्वाणगिरि रूपान्तरन्तथा धनुर्विद्यायाः श्यैनिकशास्त्रस्य च हिन्द्यामनुवादात्मकं कार्यं प्रतिनियतमासीत्। अतोऽतिरिक्तं विश्वे समुपलब्धमितिहासग्रन्थानां प्राचीनहिन्द्यां रूपान्तरेण सार्धमेव डुग्गरनरेशानामितिवृत्तादिप्रणयनञ्च निर्णीतमासीत्। कार्यालयोऽयं कदा प्रवृत्त आसीदिति निश्चप्रचं न ज्ञायते परमनुमीयते यद् रणवीरसिंहशासने कार्यालयोऽयं प्रवर्तमानः परां गौरवकोटिं समाससाद। कार्यालयस्यास्याभिलेखरूपेण यत्कार्यजातं तत् सर्वं प्रायः काश्मीरविश्वविद्यालयस्थे राजकीये सङ्ग्रहालय उपलभ्यते। तदाधारेणैतदनुमातुं शक्यते यत्तदात्वेऽत्रानुवादात्मकत्वेन सुमहद् गौरवास्पदं कार्यं सम्पद्यते स्म। तदानीं राजकीये कार्यव्यवहारे लेखाविभागे चानुवादविभागे The translation department of old record and culture इति नाम्नैवायं प्रचलति स्म। अथ तदानीन्तना भारतशासनाध्यक्षा नेदृग्विधैः स्थानीयराज्यनरेशानां कार्यकलापैः सन्तुष्टाः सन्तः स्वोद्देश्यात्प्रतिनिवृत्ता न समभूवन् परं यथा तथा ते स्वोद्देश्यपूर्तये प्रयत्नञ्चक्रुर्येन केनापि मूल्येन काश्मीरेऽवशिष्टं विद्यमानं ग्रन्थरत्नराशिं सञ्जग्रहुरमीषामुद्देश्यं प्रत्नसारवद्वस्तुजातेन सार्धं ध्वंसावशिष्टानां संस्कृतमातृकाणां मूल्येन सङ्कलनमासीत्। अस्मात्पूर्वे निबन्धे मया सङ्केतितमासीद् यत् काभिर्विधाभिः कैश्चोपायविशेषैः संस्कृतमातृकासङ्कलने साधनानि साध्यन्ते स्मेति। तदानीं श्रीरणवीरसिंहस्य सुयोग्यो मुख्यामात्यः श्रीबाबूमुकर्जी नीलाम्बरमहोदयः परमोदारया वृत्त्याऽर्थसाहाय्येन चेममनुवादविभागं परिपोषयामास।

काश्मीरभूपरिवृढस्य श्रीरणवीरसिंहस्य स्वरारोहानन्तरमपि कार्यालयमिमं सुसमाहृतया दृशा निभालयामास परं प्रतापप्रभुणा काश्मीर नरेशेन राज्यसिंहासनमधिष्ठायैव कार्यालयोऽयं विलोपित इति प्राक्तने निबन्धे निवेदितमेव। अथ सर्वतः समन्ततो वैदेशिकैर्विलुण्ठ्यमानं महत्त्वपूर्णं काश्मीरिकं सारभूतं प्रत्नवस्तुजातं ग्रन्थरत्नैः सार्धं विलोक्य तदा-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

नीन्तनानां काश्मीरमन्त्रिणां चक्षूषि विस्फारितान्यभूवन् । अथ नीलाम्बर-महोदयः स्वमन्त्रिमण्डलेन परामृश्य ज्ञानविज्ञानगर्भं प्रत्नविद्याप्रकाशा-भिधमेकं कार्यालयं द्व्यधिकैकोनविंशतितमे ख्रिस्ताब्दे प्रतिष्ठापयामास । यस्मात् काश्मीराद्वैतशैवदर्शने समुपलब्धानि प्रायः समस्तानि ग्रन्थ-रत्नानि मुद्रितान्यभूवन्निति प्रस्फुटम् । किञ्चाद्यावधि शैवदर्शनप्रकाशनेन सार्धं षण्णवतिखण्डात्मकानि पुस्तकानि प्रकाशितान्यभूवन् । कार्यालयो-ऽयमनेकानुदयास्तमयान् समयान् ददर्श येनास्य सातत्येन सर्वतोमुखी समु-न्नतिर्न दृश्यते । कदाचिदयं काश्मीरनरेशस्याज्ञया, कदाचिन्मुखमन्त्रिणो वेकफील्डस्य परामर्शेन कदाचिच्च कालविनमहोदयस्य काश्मीरप्रधान-सचिवस्यादेशेनानिश्चितकालपर्यन्तं समाप्तोऽभूत् । कदाचित् काश्मीर-पुरातत्त्वविभागेन सम्बद्धोऽभूत् कदाचिदस्य कार्यालयस्यायव्ययनियतो धनराशिह्रासं नीतः येनास्य कार्ये प्रगतिसंरोधः स्वतोऽजनिष्ट । अथ पिपीलिकागतिवेगेन प्रवर्तमानोऽयं कार्यालयोऽधुना चरमं निश्वसन्नन्तिमान् दिवसान् गणयति नास्य पूर्ववत् समयानुकूलमायव्ययविधानं प्रचलति । नायं कार्यालय एकदेशे शासकैरवस्थातुं निश्चितत्वेनादिष्टोऽभूत् । कदाचित्पु-राणसचिवालये कदाचित्संसद्भवनस्याधस्तात् कदाचिल्लालमण्डीप्रदेशे कदाचिच्च रेजीडेंसीमार्गस्थे शासनभवनेऽधुना काश्मीरविश्वविद्यालयीये वह्निभयशुद्धे पुस्तकालयेऽनधिकृतानामधिकारिणां हस्ते पतितः कालं गम-यति । षट्त्रिंशदुत्तरैकोनविंशतितमे ख्रिस्तहायन एवात्र पारस्यारव्यविभागो काश्मीरनरेशेन यथानियमं समुद्घाटितो येनैतयोर्विभागयोरप्यत्र कार्यं सुचारु-रूपेण प्रचलति स्म । अस्मै कार्याय द्वावधिकारिणौ पारस्यादिभाषा-भिज्ञौ नियुक्तावास्ताम् । स्वातन्त्र्यसूर्योदयात्प्राक् कार्यालयादस्मात् प्रायो ह्यशीतिखण्डात्मकानि पुस्तकानि प्रकाशितानि । स्वातन्त्र्यसूर्योदये दशक-चतुष्टयादप्यधिके समये केवलमष्टौ प्रकाशनान्युपलभ्यन्ते येषु संस्कृते शिवसूत्रविमर्शिन्या द्वितीयं संस्करणं विहाय त्रीण्यन्यानि प्रकाशनानि सन्ति । कार्यालयेन कदाचिदेका मुखपत्रिका षाण्मासिकी प्रकाशयिमु-मिष्टाऽऽसीद्यस्या एकमेव प्रसूनमद्य यावद् दृष्टिपथमवातरत् । अधुना कार्यालयस्य पञ्चविंशतिः महत्त्वपूर्णानि प्रकाशनानि समाप्त-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रायायेव संवृत्तानि येषां पुनर्मुद्रणाय न काप्यत्र व्यवस्था दृश्यते न चापि तेषां पुनर्मुद्रणाय यत्नो विधीयते। तेषु कतिपयानि प्रकाशनानि परिमार्ज्य भारतीयविक्रेतृभिः पुस्तकालयाध्यक्षैरधुना प्रकाशितानि यानि पूर्वापेक्षया विंशतिगुणेन मूल्येनाधुना लभ्यानि। द्वितीयं पञ्चस्तवीमालायाः प्रसूनं नाद्य तावन्मुद्रणपदवीमारूढमिति। कार्यालयेनानेव प्राग्वन्नियतेन धनराशिना यथानियमं मातृका न सञ्चीयन्ते न चापि तासां संग्रहाय कोऽपि धनराशिर्नियतीकृतः। नापि संशोधकसम्पादकेभ्यः। किमप्यनुदानं स्वीकृतम्। निष्क्रियतयावतिष्ठमानः कार्यालयः केवलं पुस्तकालयस्थानां मातृकाणां संरक्षणं कुरुते न तासां संरक्षणायाधुनिकवैज्ञानिकसाधनरसायनादीनामुपयोगः क्रियते। नापि मातृकाणां कृते पृथक् पृथक् स्थिरदृढपत्रनिबन्धनानि सन्ति। न चामुद्रितानां मातृकाणां मुद्रणाय प्रकाशनाय च किञ्चन विधानमत्र दृश्यते। अत्राधिकृतोऽधिकारिवर्गः शोधच्छात्राणां दिङ्निर्देशे प्रथप्रदर्शने च सर्वथानर्हो विद्यते। नापि किमप्यानुकूल्यं शोधार्थिनां छात्राणां कृतेऽत्र दृश्यते। कार्यालयोऽयं समग्रशैवदर्शनस्य ग्रन्थानां प्रकाशकत्वात् प्रसारप्रचारहेतुरवर्तत। कार्यालयस्यास्य स्वर्ग्याः पण्डिता महामहोपाध्यायसहजभट्टमहामहोपाध्यायमुकुन्दरामश्रीराजानकमहेश्वरश्रीहरभट्टशास्त्रिप्रभृतयः शैवशास्त्रप्रसारहेतवोऽभूवन्। काश्मीरे बाह्यदृष्ट्या दृश्यमानानां शैवमठिकानां यवनानां शासनकालत एव ह्रासो जातः। अत्रापि ज्ञानगञ्जवच्छैवमठिका दुरापाः। न तासां साक्षात्कारो योगिजनान्विहाय साधारणानां जनानां भवति। शैवशास्त्रशिक्षणाय काश्मीरेऽधुनाश्रमत्रयी समुपलभ्यते। येषु निशातारामोत्कण्ठं शैवशास्त्रदेशिकानां परमपूज्यानां श्रीलक्ष्मणब्रह्मचारिणां निजो वेश्मभूत एक आश्रमः। अपरौ द्वौ रामशैवत्रिकाश्रमश्रीस्वामिविद्याधराश्रमाभिधौ। ययोरेकः फतेहकदलेऽपरश्च कर्णनगरे समुल्लसतः। येषु शैवदर्शनस्य स्वाध्यायो नियमेन प्रचलति स्म। परमधुना पूर्ववत् स्वाध्यायोऽविच्छिन्नं न प्रचलति। एतयोः पूर्वनिर्दिष्टयोराश्रमयोः परम्परागता देशिकमहोदया न विद्यन्ते। अथ श्रीलक्ष्मणब्रह्मचारिमहोदयाः शरीरास्वस्थत्वेऽपि वैद्योक्तिं परिभाव्य तदीयानादेशानुल्लङ्घ्य स्वारसि-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कतया शिष्यान् पाठयन्नेव कदाचित् दृग्गोचरतां यान्ति। अथ काश्मीरे न संस्कृतवाचोऽध्यापनाय किमपि तन्त्रं वर्तते न वा कोऽपि संस्कृतां वाचमधीते न वाधिजिगोषते। त्रिचतुरो महाविद्यालयान्विहाय न क्वापि संस्कृतं वैकल्पिकरूपेणापि प्रवर्तते। नात्राधुनिकी वैज्ञानिकपाठ्यप्रणाली केनापि संस्कृतेऽनुवदितुं प्रयत्नोऽकारि। आधुनिकविज्ञानतन्त्रजातस्य गीर्वाणगिरि विस्तृतानुवादो नितान्तमपेक्षणीयो वर्तते अन्यथा सर्वाङ्गसमृद्धस्यास्य संस्कृतस्य नैयून्यमापतेद् येनास्य खलीकारः स्वाभाविक एव। काश्मीरे न संस्कृतपिपठिषूणां कृते कोऽपि भव्य उदर्को दृग्गोचरीभवति येनात्रत्यो जनः प्रायेणौदासीन्यमाश्रयते। इत्थं स सर्वथा सर्वतश्च स्वरूपात् प्रच्युतः। किञ्चासौ भट्टभीमकभट्टशाम्भुराजानकरत्नाकरानन्दवर्धनशिवस्वामिभट्टाह्लादराजानकमङ्खक्षेमेन्द्रराजानकजयरथ - भट्टाभिनन्दभट्टजगद्धरभावसर्वज्ञभट्टजयन्तसदानन्द-(काश्मीरिक)-राजानकानन्द वर्धनभट्टवल्लभदेवकौलसाहिबमम्मटभट्टलोल्लटभट्टरुद्रटभट्टमहिमभट्ट - कुन्तलभट्टतिलकभट्टरुय्यकभट्टशोभाकरभट्टानन्ददार्शनिकसोमानन्दोत्पला - भिनवगुप्तक्षेमराजभट्टभास्करयोगराजराजानकभास्करशिवोपाध्यायचिद्रूप चन्द्रभट्टकैयटहेलाराज जगद्धरोग्रभूतिशितिकण्ठप्रभृतीनां प्राचामर्वाचाञ्च साहिबरामईश्वरकौलगाडरूरामन्द्रकौलवासुदेवराजानकलसकाकक्रपालुकोकिलप्रभृतीनामभिधानादिपुरःसरं स्वरूपं न वेत्ति विवित्सति वेति सर्वथा स्वस्वरूपात् प्रच्युतः काश्मीरिकाधुनिकयवनजातिवत्। नाप्यसौ भारतवर्षस्यादिपुरावृत्तलेखकैः कल्हणजोनराजश्रीवरप्राज्यभट्टशुकसाहिब्रामेश्वरकौलप्रभृतिभिः सह पारिपूर्ण्येन परिचितो वर्तते।

चित्रमेतत् स्वनामधन्यानां शिवस्वरूपाणामाविष्कृतशिवाद्वैतरहस्यानां साहित्यालङ्काररजन्मदानां स्वकवितामधुरसाप्यायितोन्मादितरसिकचेतसां स्वप्रतिभाचमत्कृताखिलसहृदयानां तन्त्रमन्त्रयन्त्रकुशलानामितिहासचणानां नैकविधाद्भुततीर्थैतिह्यविदां चतुषष्टिकलाभिज्ञानामष्टादशविद्यादेशिकवराणां नैयायिकानां नीतिनिपुणानाञ्चाभिधानानि वेत्ति विवित्सति वा का कथा चरकदृढबलवाग्भट्टनरहरिराजानकलसकप्रभृती-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

नामायुर्वेदधुरन्धराणामाचार्याणां विषये कोकपण्डितं भट्टकेदारञ्च न वा जिज्ञासते। विस्मयावहमेतद् यच्छारदादेशे शारदाया उपासको न कोऽपि दृश्यते । स्वातन्त्र्यसूर्योदयात्प्राक् काश्मीरेषु सर्वेषु विद्यालयेषु संस्कृतं वैकल्पिकरूपेणाध्याप्यते स्म परमधुना तत्पठनाय कोऽपि न प्रवृत्तो भवति कारणेन तेनैव संस्कृतं न विद्यालयेषूपलभ्यते। काश्मीरिकपत्रतत्त्वविद्या-प्रकाशविभागोऽपि निष्क्रियतामापाद्यमानोऽचिरात् स्वीयं कार्यमौज्झीत्। अथौदार्यवृत्तिना देहलोस्थराष्ट्रियसंस्कृतसंस्थानेन बहुजनहिताय लोकोप-काराय जम्मूविद्यापीठान्तर्गामी परतन्त्र एको विभागो वर्षद्वयात्पूर्वं काश्मीरेषु समुद्घाटितः परं समुचितसम्भाराभावान्नैष युक्तियुक्तं कार्यं कर्तुं प्रभवति, नात्र कोऽपि स्वतन्त्र आयव्ययाधारो नियतीकृतो येनायं कार्यं कर्तुं शक्नुयात्। नात्र मातृकासंग्रहाय समुद्धरण (Reference)-पुस्तकालयाय कोऽपि धनराशिर्नियती कृतोऽस्ति न चापि यथेप्सितपण्डितानां कार्यकर्तॄणां समुचितः समावेशोऽत्र विलोक्यते । सर्वथाडम्बरवादेन सदा कार्यं न सिद्ध्यति। सर्वारम्भेषु क्रियात्मकः सहयोगो नितान्तमपेक्षणीयो वर्तते। किं च लुप्तसंस्कृतप्रचारप्रसारे काश्मीरेऽधुना विद्यापीठस्यैकस्य नितान्तमपेक्ष-णीयता वर्तते येनात्र सर्वथा संस्कृतप्रसवभूमित्वात् पुरुषपुर(पेशावर)-वत् संस्कृतं नित्यत्वेन न विलुप्यते। इत्थमाधुनिकसंस्कृतस्थितिप्रदर्शनेन मम केवलमेकमात्रमुद्देश्यमेतदेवास्ति यद् भारतीयाः काश्मीरिकाश्च न्यायमार्ग-माश्रित्यास्योद्धाराय प्रणिधानं दद्युरिति । अन्यथोपेक्षिता संस्कृतभाषा विपरीतां परिणतिं दध्याद्। येनात्रत्या संस्कृतिः समुच्छिन्नमूला सती स्वां स्वतन्त्रां स्थितिं विध्वंसयिष्यति । प्रायो भारतीया संस्कृतिः संस्कृता-श्रितैव । इति हार्दिकीं वेदनामनुभवता मया किञ्चिन्मात्रं प्रजल्प्य विरम्यते।

काश्मीरिकप्रत्नविद्याप्रकाशकार्यालयस्य ४५ वत्सरीयं प्रकाशनविवरणम्

प्रभावतीप्रद्युम्नाख्यं नाटकं रामकृष्णसूरिविरचितं कार्यालयेना-नेनाविकलं मुद्रितं सदपि वत्सर दशकेभ्यश्चतुर्भ्योऽपि नास्य नाटकस्य भूमिकालेखनकार्यं पारितमभूत्। किं च चित्तप्रदीपस्य वासुदेवरचितस्य

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वेदान्तग्रन्थस्य तत्कृतव्याख्याविभूषितस्य सुसम्पादितस्यापि मुद्रणमद्य तावन्नाभूत् । द्वितीयं पञ्चपल्लवीमालायाः प्रसूनं राजकीये मुद्रायन्त्रालये सम्पूर्णतया मुद्रितमपि नैकेनाप्यध्यक्षेण समानेतुमादिष्टम् । फलतः तत् तत्रानपेक्षितपत्रकीलादिना मिलित्वा विनष्टमभूत् । किं च छुम्भासम्प्रादायाख्यो लघुकलेवरात्मको ग्रन्थोऽप्येवमेव भूमिकादिलेखनाभावाद् राजकीयमुद्रणयन्त्रालय एव विनष्टमभूदित्येवम्प्रायासु परिस्थितिषु का सम्भावना काश्मीरसंस्कृतेरुद्धारस्य ।

अथ संस्कृतस्यात्र दुःस्थितिं निरीक्ष्य लुप्तप्रायसंस्कृतिसंस्कृतसमुद्धाराय ख्रीस्त-एकोन विंशत्युत्तरषडशीतितमेऽब्दे जनवर्यां नवदेहलीस्थ-राष्ट्रियसंस्कृतसंस्थानाधिकारिभिर्जम्मूदेशीयश्रीरणवीरकेन्द्रीयसंस्कृतविद्यापीठायत्तमेकमुपकेन्द्रं काश्मीरेषु राजबागे समुद्घाटितम् यस्य समारभ्यमाणो लघुकार्यालयो बीजरूपावस्थितोऽङ्कुररूपतामप्यनापद्यमानोऽद्य तावद् वर्तते यः कदाचिद् वृक्षरूपेण परिणम्य स्वच्छायादानेनासंख्यात्र् जिज्ञासूनार्त्तान् शोधार्थिन आह्लादयितुं क्षमः स्यात् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

LITERARY FORM AND ALAMKARAS : A NOTE

Dr. M. V. Ramana

The origin of some literary forms can be traced to the Alaṁkāras, for some of Alaṁkāras during the course of development became full-length kāvyas, e.g., the Alaṁkāra—'yamaka' gave vent to the kāvyas which fully abound in 'yamaka'—i.e. 'YAMAKA KĀVYA'. 'Vṛndāvana' and 'Meghābhyudaya' are a few such instances in point. In a like manner, 'citra' is both an Alaṁkāra and also a kind of poetry. (Citrakāvya). Similarly, the fighre 'śleṣa' has made a remarkable contribution in this field, becouse it forms the very basis for the rich variety of 'Sandhāna—Kāvyas.' In this type the same set of words in a Kāvya give more than one meaning, thus narrating simultaneously, two stories or sometimes, three, called 'DVISANDHĀNA' (Example : The 'Rāghavapāṇḍavīya of Kṛṣṇa paṇḍita) and 'TRISANDHĀNA' (Example : The Yādavarāghavapāṇḍavīya' of Anantācārya) respectively. Dr. Raghavan in his article, 'Anekasandhāna Kāvyas',[1] records the different varieties of Sandhāna Kāvyas, viz., '*Catussandhana*', (Example : The Nalayādavarāghavapāṇḍavīya), '*Pañcasandhānī*' (Example : The 'pañcakalyāṇa campū of cidambara), *Saptasandhāna* (Example : The 'Saptasandhāna Mahākāvya of Hemacandra), *Caturviṁśatisandhāna* and so on extending upto '*Śatārtha Kāvyas*' and '*Aṣṭalakṣārtha Kāvyas*'. Similarly, '*Vakrokti Kāvyas*' and '*Vyājokti Kavyas*' can be traced to their respective Alaṁkāras.

In addition to the different types of Sandhāna-Kāvyas given above, a variety of Anekasandhāna Kāvya, viz., VILOMAKĀVYA

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

is also mentioned. Even a dramatic compostion belonging to 'DVISANDHĀNA' type (Example : Yādavarāghavīya of Narahari) is noticed.[2] The figure Aprastutapraśaṁsā gradually became the Anyāpadeśakāvya. The Anyāpadeśāśatakas and the Anyāpadeśa Kāvya of Jagannātha are the instances to prove this fact.

Apart from these, there are works that fully abound in puzzles (prahelikās); e.g., The Kriyāgopanarāmāyaṇa of Kṛṣṇa Kavi. In all the verses, the verb is concealed in such a way that it is not clearly known to exist. Regarding these riddles and similar other eompositions like enigmas, puzzles, charades and tricks. the following remarks of Ludwik Sternbach are justified—

> "Some branches of Sanskrit Literature did not find yet their befitting placc in the Histories of Sanskrit Literature, or were not yet described there fully, as their importance requires. To these branches Sanskrit Literature belong in the first place Subhāṣita-Saṁgrahas, real treasuries of Indian poetry, containing thousands of veritable gems of metrical compositions. In the second place belong to these forgotten branches of Sanskrit literature riddles and puzzles, a distinct kind of literary expression which prove the ingenuity of Indian people and the wealth of Sanskrit folk literature."[3]

Among the literary theorists, it is Daṇḍin, who categorised these riddles into sixteen kinds.[4] In the 'Vidagdhamukhamaṇḍna' of Dharmadāsa, as many as seventy categories of riddles are found enumerated.[5] The Avadhānas, the Samasyāpūraṇas and the like which come under this category of literary compositions, are very much in practice even now.

The fact that the origin of some of the literary froms could be traced to the Alaṁkāras, finds support in the words of Prof. Krishnamoorthy, "In Sanskrit we have certain forms of poetry

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

like eulogy (praśasti) and stotra alongside of Anyokti, Vyājastuti and Vakrokti, not to speak of riddles. These are not just titles of figures but literary tendencies which produced new genres."[6]

Notes :

1. 'Annals of oriental Research' Madras University, Vol. III. pt. 1. (1938-39). pp. 1-8. Also Vide E.V.V. Raghavacarya's article : 'Dvyarthi and Tryarthi kāvya.'—Pathak commemoration volume. pp. 367-81, B.O.R.I., Poona.
2. Dr. Raghavan : 'Anekasandhāna kāvyas.'
3. 'Indian Riddles,' Vishveshvaranand Indological Series-67, Vishveshvaranand Vedic Research Institute, Hoshiarpur. In this monograph, the author gives a historical outline of riddles and puzzles in Sanskrit Literature. Various types of Riddles and puzzles are categorised under the heads : Prahelika and Apahnuti—Riddles, Kūṭa riddles, Gupta and Cyuta riddles, Antarālāpa and Bahirālāpa riddles, citra and Bhāṣā citra riddles etc.
4. Kāvyādarśa, III. 96-124.
5. Vide ch. I. 9-18.
6. 'Studies in Indian Aesthetics and Criticism'—(Mysore, 1979) p. 160.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

VARṆA AND ĀŚRAMA SYSTEM IN THE VEDAS

Dr. C. L. Prabhakar

'Sarasvatyai Pavakayai Svāhā'

Varṇa and Āśrama institution is a topic of interest which has engaged many like sociologists and religionists and others. If we like to trace the genesis of this organisation, we turn to the Vedas. We have a vast literature following the Vedas and therefore the subject by itself assumes larger dimensions and complexities. Infact 'Varṇa and 'Āśrama' has been a social organisation formulated for convenience of administration and division of work in the society. The literature in Sanskrit as such does not envisage to reason for differences among the people. In Vedic period, we notice a happy dealing and all Varṇas are given equal opportunity in the run of life of human society. What differences among castes cropped up in subsequent times are not testified by many literary works in Sanskrit, in the Rāmāyaṇa, Vālamīki mentions that Vasiṣṭha, the royal priest of King Daśaratha, ordered that people of all the four castes be invited for the sacrifice by Daśaratha and due presents and respect be offered to them. When they said,

"Yathoktaṁ tat Kariṣyāmo na Kiṁcit Parihāsyate/"

Then Vasiṣṭha said,

"Brāhmaṇān Kṣatriyān Vaiśyān Śūdrāṁścaiva sahasraśaḥ
Samānayasva satkṛtya sarvadeśasumānavān".

Vedic Society was a patriarchal system. The king was often due to heredity. Also the king was elected by districts or people (Viśi rājā Pratiṣṭhitaḥ) belonging to many tribes. The King was a Kṣatriya by caste, committed to the duty of protection of the people

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

